a minister of the King Guṇavarmā of Vidharbha, the modern Berars, and had a son named Mādhava. Bhūrivasu enjoyed a similar position at the court of King Padmavarmā of Padmāvatī and had a daughter named Mālatī. Devarāta sent his son Mādhava with his companion Makaranda to Padmāvatī to complete his education. On seeing Mādhava, Bhūrivasu was reminded of the solemn promise of his student-days. But a great difficulty cropped up at this stage, in that Nandana, a favourite of the king, asked for the hand of Mālatī, through the king. As Bhūrivasu could not flatly refuse the king's request he made an evasive reply and requested Kāmandakī to bring the young people together and arrange for a secret marriage between them, in order to baffle any attempt on the part of the king to stop the marriage. With the help of the friends and attendants of Mādhava and Mālatī and her own pupils, Kāmandakī manages to bring Mādhava to the notice of Mālatī several times and she falls in love with him, and paints his portrait on a canvas. Mādhava, too, sees the beautiful Mālatī in the city-garden on the occasion of Cupid's festival and loves her at first sight. His servant Kalahaṁsa, at this point, shows him his portrait drawn by Mālatī, which naturally assures him of her love for himself. He also draws the portrait of Mālatī on the same canvas and writes a stanza expressive of his love-lorn condition. Kāmandakī tries to prepare Mālati's mind for a secret marriage by praising to her the many noble qualities of Mādhava, by telling her how maidens like Śakuntalā had behaved under similar circumstances and by bringing to her notice the ugliness and stupidity of Nandana. She also insinuates that Bhūrivasu was sacrificing Mālatī for pleasing the king. Then one day she took Mālatī to the Śiva-temple, apparently to bow down to the deity and related to her the desperately love-sick condition of Mādhava, who was lying concealed in the

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

adjoining bower of creepers, and Lavaṅgikā who had accompanied Mālatī declared that Mālatī too was pining for Mādhava. Just then it is reported that Madayantikā was attacked by a tiger which had broken loose from its cage and Mādhava rushes out to help Madayantikā and is greatly admired by Mālatī for this act of gallantry. Before, however, Mādhava could arrive on the scene, Makaranda has already rescued her and is himself wounded by the beast and faints. Mādhava becomes unconscious at this sight.

As they regain consciousness, a messenger enters, announcing that the king has formally promised the hand of Mālatī to Nandana. Kāmandakī tries to console Mādhava, who is greatly dejected to hear the news, and goes away with Mālatī. Mādhava is, however, disconsolate and tries to win his lady-love by propitiating the ghouls by selling human flesh and repairs to the cemetary for that purpose. There he hears piteous cries from the adjoining Karālā-temple and rushes in just in time to save Mālatī whom Aghoraghaṇṭa, a Kāpālika, was about to offer in sacrifice to the terrible goddess. In the fight that ensues he kills Aghoraghaṇṭa, but lets off his female disciple Kapālakuṇḍalā unharmed. She, however, while departing threatens Mādhava with dire consequences for killing her master.

The next day, Mādhava and Makaranda are taken by Avalokitā, one of the pupils of Kāmandakī, to the temple of the guardian deity of the city and are asked to await the arrival of Mālatī in the inner sanctuary of the temple. Mālatī accompanied by Lavaṅgikā arrives shortly afterwards and Kāmandakī leads her to the inner shrine and introduces her to Mādhava and speaks words of cheer and encouragement to remove her nervousness. Kāmandakī then turns to Makaranda and asks him to put on the dress and ornaments brought for Mālatī and to get married to Nandana

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

in that disguise. In the meantime, Mādhava is sent to an already prepared place for being formally married to her.

Makaranda is wedded to the unsuspecting Nandana. When the latter meets his supposed wife and makes her advances of love he receives a cold rebuff and finally a kick. Nandana walks away in great anger, vowing that he would not even touch his wife again.

Then Buddharakṣitā, another pupil of Kāmandakī, brings Madayantikā to the chamber where Makaranda disguised as Mālatī was feigning sleep and asked her to scold Mālatī for her rudeness to her brother. While she is rebuking Mālatī and defending her brother's behaviour, the conversation is cunningly turned upon Makaranda and Lavaṅgikā asks Madayantikā what she would do, if Makaranda were to come there. Madayantikā replies that she considers herself as belonging to Makaranda, who had saved her from the jaws of death even by endangering his own life. Thereupon Makaranda throws off his disguise and elopes with Madayantikā from Nandana's house. But, unexpectedly, he is challenged by the city-guards and a fight ensues. Mādhava on hearing of this alarming report runs to his friend's rescue. When the king hears of the elopement of Makaranda with Madayantikā, he is greatly enraged and sends out more guards ; but Mādhava and Makaranda fight so bravely that the king who was watching the fight from his palace, was filled with admiration for the youths and on knowing of their noble birth congratulates Bhūrivasu and Nandana on getting such worthy bride-grooms, and appeases their resentment.

Soon after Mādhava went in aid of his friend, Mālatī sends Lavaṅgikā after him to warn him to be careful in the fight. Kapālakuṇḍalā finds Mālatī all alone and pouncing

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

upon her takes her off to Śrīparvata to kill her there. But Saudāminī rushes to her rescue in the nick of time and goes with her to her own abode.

Mādhava and Makaranda enter the garden expecting to meet Mālatī. But when they could not find her even after a great search, Mādhava faints ; and believing him to be dead Makaranda wants to commit suicide. Bhūrivasu and Devarāta also, on hearing of the loss of Mālatī decide to put an end to their lives. In another part of the forest Kāmandakī Madayantikā and Lavaṅgikā, too, resolve to commit suicide on account of the disappearance of Mālatī. It is left to Saudāminī, of supernatural powers, in each case, to save all these people from disaster and death. She first revives Mādhava, assures him of Mālatī's safety and flies with him to Śrīparvata, to meet Mālatī who is already there. She then saves Kāmandakī and other ladies by bringing to them Mādhava and Mālatī and herself rushes on to the aid of Bhūrivasu and Devarāta. But in the meanwhile, Mālatī and Mādhava faint on hearing from the cries of foresters that Bhūrivasu and Devarāta are about to commit suicide. Saudāminī soon enters announcing that both the ministers are unharmed. She bows down to Kāmandakī, her preceptress and is highly complimented by her on saving the lives of so many people. Saudāminī now produces a letter from the king of Padmāvatī, declaring his approval of the two secret marriages. Kāmandakī then relates the old vow of the two ministers and the plans to secure its fulfilment, and Mādhava and Makaranda live happily with their brides and all are pleased at the happy turn of events.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

ऋजुलघ्वी : मालतीमाधवकथा।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

॥ श्री ॥

॥ ऋजुलघ्वी ॥

(मालतीमाधवकथा)

महत् प्रकरणं[1] येन स्वोत्पाद्यचरितं[2] कृतम् ।
चिरन्तनाय कवये नमोऽस्मै भवभूतये ॥ १ ॥

प्रकरणतिलकं यन्मालतीमाधवाख्यं
सुकुटिलमितिवृत्तं तस्य बालैर्दुरापम् ।
सरसविविधवृत्तैः पद्यबन्धैस्ततोऽहं
प्रगुणविरचितं तद्दर्शयिष्ये समासात् ॥ २ ॥

अस्ति श्रियोऽन्तःपुरमग्रहारः
पृथ्व्यङ्गनायाः प्रथितोऽग्रहारः ।
पदं महत्पद्मपुरीति नाम्ना
धर्मस्थिराणां धरणीसुराणाम् ॥ ३ ॥

तत्रान्वयायश्रुतवृत्तवित्तौ
मान्यौ द्विजौ माधवकेशवाख्यौ ।
बभूवतुर्बद्धजगत्प्रमोदौ
भुवि स्फुरन्ताविव पुष्पदन्तौ ॥ ४ ॥

---

1. जगत्प्र०; महप्र° suggested by the Ed. of the Tri. Cat.
2. सोत्पाद्य°; स्वोत्पाद्य° suggested by the Ed. of the Tri. Cat.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पितॄनमर्त्यानतिथीन्महर्षीन्
भूतानि च प्रत्यहमेधयन्तौ ।
स्तम्भाविवोच्चैर्दधतुः[3] स्थिरौ तौ
गृहं चतुर्णां गतिमाश्रमाणाम् ॥ ५ ॥

पूर्वस्तयोरजनयत्किल देवरातं
पुण्यैः प्रसाद्य नियमैः पुरुषं पुराणम् ।
अन्यस्तु भूरिवसुमन्वितनामधेयं
तेजोभरैर्धनचयैश्च[4] समग्रभावात् ॥ ६ ॥

आशैशवादाचरतोः स्ववृत्तै-
राश्चर्यभूतैर्जगतः प्रमोदम् ।
परस्परं प्रेम तयोः परार्ध्यं
सोमत्विषोः सोदरयोरिवासीत् ॥ ७ ॥

जन्म द्वितीयं जगदर्चनीयं
सम्प्राप्य संतोषकरौ स्वपित्रोः ।
विचेरतुस्तौ विविधान्दिगन्तान्
विशिष्टविद्याग्रहणादरेण ॥ ८ ॥

तयोस्तृतीयाऽप्यभवत्सतीर्थ्या
कामन्दकी नाम महानुभावा ।
प्रव्राजिका सौगतमार्गनिष्ठा
सौदामिनी पर्यचरत्तदा ताम् ॥ ९ ॥

---

3. दधति; दधतुः suggested by the Ed. of the Tri. Cat.
4. °ह्रैर्वन°; °भरैर्धन° suggested in the Tri. Cat.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

जननीव हितेषु जाग्रती सा
स्थिरविस्रम्भपदं तयोः सखीव ।
प्रशमैकनिधिः प्रमेव साक्षा-
दखिलार्थेषु परं प्रमाणमासीत् ॥ १० ॥

सकलासु कलासु पारदृश्वा
नृपविद्यासु चतुष्टयीष्वधीती[4A] ।
स तथा प्रथते स्म देवरातो
विदुषां भूरिवसुर्यथा समाजे ॥ ११ ॥

कामन्दकया सह सवयसा कामिताः प्राप्य विद्याः
दत्तानुज्ञौ प्रियधनसमाहारतुष्टैर्गरिष्ठैः ।
स्वीयं देशं प्रतिजिगमिषू सौहृदात्पूर्णकामौ
सौदामिन्याः सपदि पुरतश्चक्रतुस्तौ प्रतिज्ञाम् ॥१२॥

स्वां दुहितरं दुहितृमान् पुत्राय दृढं ददातु पुत्रवतः ।
इत्यावयोः प्रतिज्ञां कलयतु[5] कामन्दकी साशिष्येति ॥ १३ ॥

ततः प्रतीतौ स्वगृहान्प्रविश्य तौ
सतोः स्वपित्रोश्चिरकांक्षितं फलम्[6] ।
परार्ध्यसम्बन्धपराकृतश्रमं
द्वितीयमध्यूषतुरिद्धमाश्रमम् ॥ १४ ॥

विदुषां समितौ विदर्भराजो
गुणवर्मा निशमय्य तद्गुणौघान्[7] ।
विनयादुपहूय देवरातं
सचिवं सर्वधुरन्धरं चकार ॥ १५ ॥

4A चतुर्विधास्वधीती suggested by Pt. R. K. Patankar Shastri.
5. कलयति. 6. [illegible] 7. °वर्तनशमय्य तं गु°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पद्मावतीपुरपतिः किल पद्मवर्मा[8]
संभाव्य भूरिवसुमक्षतमन्त्रशक्तिम् ।
तस्मिन्निवेश्य धरणीभरमस्तचिन्तो
भोगानभुङ्क्त विबुधांश्च मखैरपारीत् ॥ १६ ॥

शुश्रूषया भगवतीमनुमान्य तुष्टां
सौदामिनीं तदुपदिष्टविशिष्टविद्या ।
[9]श्रीपर्वतं सकलसिद्धिपदं प्रपेदे
कापालिकव्रतमधत्त च मन्त्रसिध्यै ॥ १७ ॥

गुरुप्रसादमन्त्राणां विधिवत्साधनादपि ।
सौदामिन्याः प्रसादोऽभून्कोऽपि सिध्यष्टकान्वितः ॥ १८ ॥

....

....
[10]नाम्ना पितुः स्वस्य नरेन्द्रमन्त्री
मान्यं सुतं माधवमेव चक्रे ॥ १९ ॥

स देवरातस्य सुतो महात्मा
कामन्दकीं काम इवावतीर्णः ।
वात्सल्यविद्यामधुरप्ररोहैः
श्रेष्ठैर्गुणैः शृङ्खलयाञ्चकार ॥ २० ॥

---

8. °वर्मा. 9. 18^a wrongly repeated between 17^b and 17^c.

10. At least two lines describing the birth of माधव seem to be lost.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

माधवे भजति पञ्चमीं समां
देवराततनयैकदैवते ।
आप भूरिवसुरात्मजां शुभां
मालतीं स्वजनमौलिमालतीम् ॥ २१ ॥

आकर्ण्य तां भूरिवसोः प्रसूतिं
अथोत्सवादुत्सवमापतन्ती ।
पद्मावतीं[11] प्रव्रजिता प्रतस्थे
पद्मामिव द्रष्टुमिलावतीर्णाम्[11A] ॥ २२ ॥

सा लालयन्ति भुवनैकभूषां
सौन्दर्यभारैरभिसंवृतां ताम् ।
अपोषयन्माङ्गलिकैरुपायैः
प्रवालवल्लीमिव सिन्धुवेला ॥ २३ ॥

कलासु गीतप्रमुखासु बालां
कन्दर्पविद्यासु च साधु निन्ये ।
शिक्षामसौ शिल्पविशेषदक्षां
जोत्स्ना सुमुक्तामिव भावयन्ती ॥ २४ ॥

अत्रान्तरे शिक्षितुमात्मविद्यां
आरूढतारुण्यविशेषकान्तः ।
स देवरातेन सुतो विसृष्टः
पद्मावतीं पद्ममुखो जगाम ॥ २५ ॥

---

11. °पतन्तीं पद्मावती. 11A. इहाव°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

महीयमानो मधुनेव साक्षा-
न्मान्येन सख्या मकरन्दनाम्ना ।
महर्द्धिरद्योतत माधवोऽसौ
मनोभवं प्रज्वलयन् वधूनाम् ॥ २६ ॥

तमीक्षमाणा नगरे तरुण्यः
स्वीयैर्मनोभिस्तरलायमानैः ।
निरस्यमानानपि नीविबन्धान्
अनङ्गपीडाभिरचेतयन्त्यः ॥ २७ ॥

महीयसी भूरिवसोः प्रतिज्ञा
मनस्यगाधे सरसीव सुप्ता ।
विलोकनादस्य विबुद्ध्यमाना
नवत्वमूहे नलिनीव भानोः ॥ २८ ॥

नर्ममित्रमथ तां नरभर्तु-
र्नन्दनो गतवयाश्च्युतरूपः ।
मालतीं नृपमुखेन ययाचे
माननीयनवयौवनभूषाम् ॥ २९ ॥

निजां प्रतिज्ञामपहातुमक्षमो
नृपस्य याच्ञां च निषेद्धुमञ्जसा ।
उदारशीलः सचिवो विसंष्ठुलां
उवाह डोलायितशेमुषीं क्षणम् ॥ ३० ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ दृढमनुचिन्त्य मन्त्रिमुख्यो
नृपतिमुवाच निराकृतच्छलेन ।
प्रभवति निजकन्यकाजनस्य
प्रभुरिति तच्छलतां प्रकाशयाम ॥ ३१ ॥

[भूरिवसुः कामन्दकीं उवाच[१२]]

उपचारभाषितमृतेऽपि याचते
नृपमुखेन तव दुहितरं स नन्दनः ।
संविदपि वितरितुं विहिता
ननु देवरातनयाय मालतीम् ॥ ३२ ॥

नृपो यथा न विकृतिमेति
हृतिरपि यथा न संविदः ।
नेतुं त्वमर्हसि तथा घटनां
मतिशालिनां किमिव नाम दुर्घटम् ॥ ३३ ॥

अवलोकितया मान्यबुद्धरक्षितया तथा[१३] ।
शिष्याभ्यां ते वशीकार्ये मालतीमदयन्तिके ॥ ३४ ॥

माधवे मकरन्दे च मालतीं मदयन्तिकाम् ।
... ... ॥ ३५ ॥

---

12. There appears to be some lacuna in the text. A stanza describing that भूरिवसु went to कामन्दकी and informed her of the unreasonable demand of the King seems to be lost. I have supplied the words भूरिवसुः कामन्दकीं उवाच to bridge up this gap.

13. The transcript indicates by dots that a line is wanting after अवलोकितया etc. But I think that अवलोकितया etc. goes well with शिष्याभ्यां etc. and that माधवे etc. is in need of the second line.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

न यथा मदीयमतिपूर्वकृतिः प्रथते[14] यथा च घटतेऽभिमतम् ।
महिते यथा घटय कृत्यमिदं नयतां हि संवरणमात्मधनम् ॥ ३६ ॥

तन्नीतेरिति विवृते मया भवत्यै
त्वं यत्ने नियतमितोऽधिके प्रमागम् ।
तत्साध्यं किमिव हि यन्न साधयेयुः
शुद्धा धीः श्रुतममलश्च पक्षपातः ॥ ३७ ॥

अहं च देवरातश्च त्वयि तिष्ठावहे यतः
आवां-भूत्वा ततः सर्वं सम्पादयितुमर्हसि ॥ ३८ ॥

संमन्त्र्येत्थं मन्त्रिमुख्ये प्रयाते
सच्छिष्याभ्यां संप्रयुक्तोपदेशा ।
चक्रे हृष्टा सा निसृष्टार्थदूत्यं
स्पष्टस्नेहात् तत्प्रदिष्टाऽविशिष्टम् ॥ ३९ ॥

कामन्दकीनियोगाद्धात्र्याः पुत्री लवङ्गिका नाम ।
भवनवलभीगवाक्षे निवेशयामास[15] मालतीं बहुशः ॥ ४० ॥

अवलोकिता च माधवमपदेशैः सोपपत्तिकैस्तैस्तैः ।
समचारयदतिचतुरा तद्भवनासन्नरथ्यया बहुशः ॥ ४१ ॥

दृष्ट्वा दृष्ट्वा माधवं मन्त्रिपुत्री
सौभाग्याब्धिं सौधवातायनस्था ।
चित्ते विद्धा चित्तयोनेः पृषत्कै-
र्वारं वारं मोहमुद्रामुवाह ॥ ४२ ॥

14. प्रजथे. 15. निवेशयास.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मकरन्दोद्याने तौ मन्मथयात्रामहोत्सवे सख्यौ ।
अन्योन्यदर्शनामृतमचिन्तितोपनतमन्वभावयताम् ॥ ४३ ॥

अपृच्छदन्तिकागतां प्रसङ्गतोऽथ लिङ्गिनीम् ।
लवङ्गिकामुखेन सा प्रियस्य संभवादिकम् ॥ ४४ ॥

अभिजनधनविद्यावित्तसौभाग्यपूर्वं
गुणितमथ गुणौघं प्रेयसश्श्रीवरिण्या[16] ।
सकुतुकमुपकर्ण्य श्रीमती सत्प्रयोगाद्[17]
द्विगुणमवहदन्तःशल्यमाभङ्गकेन ॥ ४५ ॥

शाकुन्तलादीनितिहासवादान्
प्रस्तावितानन्यपरैर्वचोभिः ।
श्रुत्वा तदुत्सङ्गनिवेशिताङ्गी[18]
चिराय चिन्तास्तिमितत्वमाप ॥ ४६ ॥

बकुलकुसुममालां माधवेनाभिनद्धां
विषमरचितभागां वल्लभालोकमोहात् ।
सविनयमुपगम्य प्राप्य धात्रेयिका सा
स्तनतटभुवि तस्याः प्राणरक्षामिवाधात् ॥ ४७ ॥

मालत्या स्वविनोदनाय लिखितां तां माधवस्याकृतिम्
धात्रेयी स्वसखीं विहारनिलयां मन्दारिकां प्रापयत् ।
तद्भर्त्रा कलहंसकेन सुधिया दासेन तस्य स्वयं
तीर्थेन स्फुटमद्य माधवकरं यायादयत्नादिति ॥ ४८ ॥

---

16. श्रीवरिण्या. 17. सप्रयोगाद्वि°. 18. मरुत्स°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मारव्यथां कथयतः सुहृदे गरिष्ठां
    मालत्यपाङ्गलहरीहृतधैर्यवृत्तेः ।
कम्रा निजप्रतिकृतिः कलहंसकेन
    चित्रार्पिता करमनीयत माधवस्य ॥ ४९ ॥

केनेति माधवतनुर्लिखितेति सख्या
    पृष्टः प्रहृष्टमनसा कलहंसकोऽसौ ।
तस्मै तदागमनमार्गमुवाच युक्त्या
    तल्लेखकं तदभिलेखनतः फलं च ॥ ५० ॥

श्रुत्वाऽथ तत्प्रियसखं मकरन्द ऊचे
    तस्यां भवानिव दृढं त्वयि साऽपि रक्ता ।
तत्सङ्गमं प्रति सखे न हि संशयोऽस्ति
    यस्मिन् विधिश्च मदनश्च कृताऽभियोगः ॥ ५१ ॥

अत्रैव चित्रफलके लिख वल्लभां तां
    द्रष्टव्यकान्तिरिह चित्तविलोभनी ते
इत्यर्थितः प्रियतमां स युवा लिलेख
    श्लोकं च तत्र दृढतत्प्रणयाग्रदूतम् ॥ ५२ ॥

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
    प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
    नयनविषयं जन्मन्येकः स एव महोत्सवः ॥ ५३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ लवङ्गिकयोपहृतां निजां
प्रणयिना लिखितां प्रतियातनाम् ।
तदपि पद्यमवेक्ष्य तनूदरी
सदृशदुःखतया कियदाश्वसत् ॥ ५४ ॥

कुटिलनयपटुः पिता शठस्त्वां
नृपसुहृदे बत नन्दनाय दित्सन् ।
प्रभवति निजकन्यकाजनस्य
प्रभुरिति भूपमुवाच याचमानम् ॥ ५५ ॥

गतवयसि विरूपे नन्दने मन्दबुद्धौ
कथमयमनुरागस्तस्य हेति ब्रुवाणा ।
पितरि च विचिकित्सां नन्दने चोरुवैरं
समजनयदमुष्याः साधु कामन्दकी सा ॥ ५६ ॥

अभिवन्दितुमीश्वरं तया
महिते कृष्णचतुर्दशीदिने ।
समनीयत शङ्करालयं
मधुरा माधवजीवनौषधिः ॥ ५७ ॥

तदुपवनलतानिकुञ्जके
प्रथमतरं विनिवेश्य माधवम् ।
स्वविषयमनुरागमस्य सा
हरिणदृशी निजगाद शृण्वतः ॥ ५८ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ पटुहृदया लवङ्गिका सा
प्रणयिनि शृण्वति सादरं प्रियायाः ।
अकथयदतिविस्तरेण वृत्तं
तदुपहृतस्मरखेदशोचनीयम् ॥ ५९ ॥

मदयन्तिकाऽथ सहवुद्धरक्षिता
शिववन्दनाय शिवमन्दिरं गता ।
नखरायुधेन पथि वाध्यते जवा-
दिति चुक्रुशुः प्रथममाकुला जनाः ॥ ६० ॥

कटुकं तदसौ च निशम्य वचः
क नु सा क नु सेति वदन् निरगात् ।
लतिकाभवनात् प्रिययाऽऽकुलया
स्फुटकौतुकमाशु दृशा स्नपितः ॥ ६१ ॥

नरपतिरुपयातो नन्दनस्याधिवासं
सचिववरगिरं तां तत्त्वमेवावगच्छन् ।
मनसि किल विधातुं नर्ममित्राय तोषं
पितुरदित परोक्षे मालतीं स्वस्य वाचा ॥ ६२ ॥

तत्प्रदानमुपकर्ण्य विवर्णो
माधवस्य परिशंक्य विपादम् ।
आपतन् सरभसं मकरन्द-
स्तां ददर्श मृगराडभियुक्ताम् ॥ ६३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

खरनखरकदम्बदम्भोलिसंभेदमुह्यज्जन-
क्षरितरुधिरसिक्तमार्गो न यावन्मृगग्रामणीः ।
प्रमृशति मदयन्तिकां तां विलोलांशुकान्तां भिया
द्रुतगति मकरन्दनामा स तावत् स्थितो मध्यतः[19] ॥ ६४ ॥

उरःपीठीगाढीभवदतिनिशातस्थिरनख-
प्रहारप्रश्च्योतत्क्षतजघुसृणालङ्कृततनुः ।
भुजावल्गत्खड्गत्रुटितविकटस्कन्धकटकं
नरव्याघ्रो व्याघ्रं नरकनगरागन्तुमकरोत् ॥ ६५ ॥

वीरस्य तस्य विपुलेन बलेन दोष्णोः
संरक्षणेन समये दयया कृतेन ।
कान्त्या गुणैश्च विवशा मदयन्तिका सा
गाढप्रहरविधुरं प्रियमालिलिङ्गे ॥ ६६ ॥

सुहृन्मोहमुग्धस्ततो माधवोऽभूत्
परिव्राजिकाद्याश्च संभ्रान्तचित्ताः ।
सुतस्नेहवेगेन कामन्दकी तौ
समाश्वासयन्मन्त्रपूतैः पयोभिः ॥ ६७ ॥

अथ नन्दनेन पुरुषः प्रहितो
मदयन्तिकामवददुन्मदधीः ।
सचिवाय ते प्रथमजाय नृप-
स्तनयामिमामदित भूरिवसोः ॥ ६८ ॥

---

19. स्थितामवध्यत But cf. कुतोऽपि मकरन्द एत्य सहसैव मध्ये स्थितः । (III. 18) मा. मा. Dr. Bhandarkar's ed. p. 167.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

तदुपेहि महोत्सवं विदध्याः
सुहृदो मानय दुर्हृदो हतास्ते ।
चिरकालमनोरथं तदैत-
न्महय भ्रातृविवाहमङ्गलं ते ॥ ६९ ॥

इति गिरमुमकर्ण्य वर्ण्यमानां
सपदि विवर्णतरौ बभूवतुस्तौ ।
शशिरुचिकुमुदाकराविवोभा-
वुषसि सुता सचिवस्य माधवश्च ॥ ७० ॥

अयि शशिमुखि दिष्ट्या वर्धसे भ्रातृवृद्ध्या
नियतमिति वदन्तीं लिङ्गिनीं वन्दमाना ।
अधिकमभिवहन्ती नन्दथुं[20] नन्दनस्य
प्रसभमवरजा सा मालतीमालिलिङ्गे ॥ ७१ ॥

मकरन्दमिव स्फुटारविन्दा-
न्मकरन्दान्मदयन्तिका मराली ।
परिलुण्ठ्य मनः सपक्षपातात्
प्रियसख्या सह मन्दिरं प्रतस्थे ॥ ७२ ॥

ततो गतायां मदयन्तिकायां
भूरिव्यथां भूरिवसोः कुमारीम् ।
म्लानं तथा माधवमप्यवेक्ष्य
कामन्दकी सानुनयं बभाषे ॥ ७३ ॥

20. नन्दथुर्नं°

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

कन्यादाने न[21] हि नृपतयो लोकवृत्त्या प्रमाणं
मन्वादीनामपि न वचनं मन्महे तत्र मूलम् ।
व्याजोद्गीर्णा नियतमनृता मन्त्रिणश्चापि वाणी
तत् किं मोहं व्रजसि मयि च त्वच्छिवैकोद्यमायाम् ॥ ७४ ॥

इत्थमाश्वास्य वचनैर्मालतीमातृचोदिता ।
आदाय मालतीं दीनामगात् कामन्दकी गृहात् ॥ ७५ ॥

श्रुत्वा तद्वचनं निराशहृदयो मिथ्यासमाश्वासनं
कामित्वात् पुनराशया कवलितः कांक्षन्नुपायान्तरम् ।
एकाकी मकरन्दमप्यसुसमं मुक्त्वा छलान्माधवः
कार्यं साहसिकैर्नृमांसपणनं कर्तुं स्मशानं ययौ ॥ ७६ ॥

करकलितकृपाणः कुन्तलैरूर्ध्वबद्धै-
र्दृढपरिकरबन्धः श्लिष्टचण्डातकश्रीः ।
दधदितरकरेऽसौ शस्त्रपूतं नृमांसं
व्यरुचदलमुपेतौ वीररौद्राविवैक्यम् ॥ ७७ ॥

निर्व्यूढे रजनीमुखे तमसि च प्रौढेऽवगाढे दिशो
मेदस्फीतरुचाञ्चितं हुतभुजामर्चिर्भिरभ्यर्चितम् ।
वेतालीकरतालिकापटुनटद्भूतादिगीताकुलं
कीर्णं जीर्णपिशाचिकाभिरमुना प्रापे श्मशानं पुरः ॥ ७८ ॥

---

21. दानं.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

सीत्कारैर्भैरवाणां[22] दिशि दिशि हृषितैर्व्याप्तानां वृकाणां[23]
फूत्कारैः फेरवाणामतिकटुरुदितैरुत्कटानां किटीनाम् ।
वेतालीनां च केलीकलितकिलकिलासङ्कुलैर्हस्तताले-[24]
[25]राकीर्णं सर्वतस्तत् क्षणमिव रुरुचे शब्दतन्मात्रमात्रम् ॥ ७९ ॥

कोलाहले तत्र शमं प्रयाते शवामिषास्वादविवादमूले ।
संघोषयामास कृताभिसन्धिः श्मशाननिष्ठान् प्रति भूतवर्गान् ॥८०॥

अशस्त्रपूतनिर्व्याज[26]पुरुषाङ्गोपकल्पितम् ।
विक्रीयते महामांसं गृह्यतां गृह्यतामिति ॥ ८१ ॥

आघोषणामसकृदेवमुदीर्यमाणा-
माम्नायपूतवपुषा द्विजपुङ्गवेन ।
आकर्ण्य तूर्णमुपजग्मुरमुष्य पश्चा-
दाथर्वणीं श्रुतिमिव स्वयमासुरौघाः ॥८२॥

आचारैर्विविधैरलौकिकविधासंवेष्टितैश्चेष्टितै-
रालापैर्विकटैर्विहारघटनाकोलाहलैर्लोहलैः[27] ।
आकल्पैः सुजुगुप्सितैरनुचितारम्भैश्च संभोगकै-
स्तेषामेष चिरं जहास दयिताविश्लेषदीनोऽपि सन् ॥ ८३ ॥

---

22. सात्कारैः...रवाणान्दिशि°. 23. वृकानां.
24. कलिकिला. 25. ताले......सर्वं°.
26. अशस्त्रपूतमव्याजं is the reading in printed eds. of the मा. मा.
27. °लोंहकैः But लोहलैः appears to be the correct reading as it rhymes well with कोलाहलैः cf. क्षीरस्वामी—लुह कत्थनादौ—अमरकोश with क्षीरस्वामी's Com. Poona Oriental Series no. 43. p. 244.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

निःसत्त्वानुपहस्य पूतनगणान् सत्रासमन्तर्हितान्
देवो रुद्र इव स्वयं पितृवने बंभ्रम्यमाणः प्रभुः ।
निर्विण्णो नितरां करङ्कपटलीरङ्गत्तरङ्गाकुलां
सीमानं पितृकाननस्य कुणपैर्दुष्टां[28] नदीं दृष्टवान् ॥ ८४ ॥

प्राकारेण हिरण्मयेन कलितं माणिक्यरोचिश्छटा-
बालव्रश्नमरीचिवीचिपटलस्पष्टस्फुरद्गोपुरम् ।
दूरादायतनं दिवेव ददृशे वीरेण घोरोज्ज्वलं
यत्रास्ते विविधोपहाररसिका काली करालाह्वया ॥ ८५ ॥

अनुसन्ध्यमघोरघण्टनाम्नो
नृकपालाभरणस्य मुख्यशिष्या ।
उपगच्छति मन्त्रसाधनेच्छो-
र्वचसा तस्य कपालकुण्डलाख्या ॥ ८६ ॥

श्रीपर्वतादुपगताविव निर्भयौ तौ
जीवात्मकैर्बलिभिरर्चयतश्च चण्डीम् ।
इत्थं पुरा श्रुतवतः पुरलोकवार्तां
तत् स्थानमेतदिति धीः प्रथतेऽस्य यावत् ॥ ८७ ॥

तावच्च हा कठिन तात नरेन्द्रबुद्धे-
राराधनोपकरणं भवतो जनोऽयम् ।
वध्या विपद्यत इति श्रवसी तुतोद
सन्तप्तसूचिरिव काचिदरुन्तुदा वाक् ॥ ८८ ॥

---

28. °दृष्टनदी.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

श्रुत्वा च किं न्विदमिति श्रुतपूर्वनाम–
 संवादतः कलुषबुद्धिरनिष्टशङ्की ।
गन्तुं ततोमुखमियेष न च क्षमोऽभूत्
 संस्तम्भकम्पितगतिः सलिलाविलाक्षः ॥ ८९ ॥

गत्वा हठात् पुनरपश्यद् घोरघण्टं
 देव्यर्चनोपकरणं ददतीं च शिष्याम् ।
तन्मन्त्रसाधनविधावुपयाचितं प्राक्[29]
 स्वं जीवितं च पुरतः कृतवध्यचिह्नम् ॥ ९० ॥

बहलघुसृणलिप्तां बद्धबन्धूकमाल्यां
 अलिकनिहितलाक्षाबिन्दुमारक्तवस्त्राम् ।
बलवदरिकरस्थां बन्धुविश्लेषदुःस्थां[30]
 बलिपशुपदमाप्तां प्रैक्षत प्राणनाथाम् ॥ ९१ ॥

अथ तावदकुण्ठ्यचण्डमुण्डां
 कुसुमाद्यैरवतोष्य च स्तवैः स्वैः ।
अयि शंस मनोगतं तवेति
 त्वरितावूचतुराकुलां कुमारीम् ॥ ९२ ॥

प्रिय माधव ! मन्दभाग्ययाऽनया
 न मया[31] त्वं महितः करार्पणात् ।
परलोकगताप्यहं त्वया
 परिचिन्त्येति रुरोद भामिनी ॥ ९३ ॥

---

29. °दुपयाचिता प्राक्. 30. दुस्थां. 31. अनया.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ मालतीं कुसुमचारुरुचिं
विनिहन्तुमाशु सुकुमारतनुम् ।
असिमाददे ज्वलितमस्तघृणः
कठिनो निदाघनववर्मरुचिम् ॥ ९४ ॥

सावेगमद्भुतबलः सहसाऽभिपत्य
खड्गं प्रकोष्ठकुलिशेन निरस्य दूरात् ।
निर्भर्त्स्य रोषपरुषैर्वचनैर्मुसल्यं
प्राणेश्वरीमभयदः प्रणयी डुढौके ॥ ९५ ॥

आलोक्य पोतमिव सागरमज्जने द्रा-
गात्मेशमागतमचिन्तितमेव काले ।
आनन्दशोकविषमक्षरदश्रुपूरा[32]
वक्षःस्थलेऽस्य विपुले वनिता पपात ॥ ९६ ॥

आलिंग्य गाढमवसिक्तमिवामृतौघै-
राश्वास्य तां प्रणयवृष्टिनिभैर्वचोभिः ।
अन्वेषकेष्वपि समर्प्य पितृप्रयुक्ते-[33]
ष्वाहन्तुमप्रतिबलो रिपुमभ्ययासीत् ॥ ९७ ॥

ततस्तयोरप्रतिवार्यवीर्ययो-
रसिद्वयाघातलसत्स्फुलिङ्गयोः[34] ।
बभूव जन्यं प्रतिगर्जतोः क्रुधा
बलीयसोर्द्रौणिगुरुद्रुहोरिव ॥ ९८ ॥

---

32. °विषसक्षर° 33. पितृप्रयुक्ते° 34. असिद्वया°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

गतिश्च्युता[35] सा गगने पुरा कृता
मतिः[36] प्रनष्टा खलु मन्त्रसिद्धिजा ।
हतस्य पाषण्डपशोर्[37]अधर्मतो
महीसुरेन्द्रस्य महः स्म वर्धते ॥ ९९ ॥

अथ सुचिरविमर्दाद्गाढमायस्तमूर्ते-
रसिवरमपहृत्य ब्रह्मशत्रोः कराग्रात् ।
भुवमनुविनिपात्य प्रौढमाहत्य पद्भ्यां
झटिति रटत एव व्यालुनाद्[38]उत्तमाङ्गम् ॥ १०० ॥

शीर्षच्छेद्या त्वमपि तदपि स्त्रीवधो मे न युक्तः
पापे दूरं द्रुतमपसरेत्युज्झिता माधवेन ।
मत्कोपस्य प्रसरमचिराद् द्रक्ष्यसीत्येनमुक्त्वा
पाषण्डी सा दिवमुदपतद् बाष्पपर्याकुलाक्षी ॥ १०१ ॥

अथ रजनिविरामे सिन्धुपारावगाहा-
च्छुचिररुणमुपास्य प्रेयसीत्राणतुष्टः ।
नगरमविशदुच्चैर्नन्दनोद्वाहलीला-
पिशुनमुरजघोष[39]व्याप्तदिक्चक्रवालम् ॥ १०२ ॥

ततस्तमवलोकिता भगवतीनियोगाद्रहो
निवेश्य सुहृदा समं नगरदेवतामन्दिरे ।
उपानयत मालतीं तदभिवन्दनच्छद्मना
करेणुमधिरोहितां नवविवाहवेषोज्ज्वलाम् ॥ १०३ ॥

---

35. गतिच्च्युता°. 36. मतिप्रनष्टा. 37. हतस्य...पाण्डवशो°.
38. व्यालुहादु°. 39. मुरवघोष°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

कैश्चिन्मङ्गल्यगीतिस्तुतिमुखरमुखैः कैश्चिदानन्दनृत्त-
व्यग्रैः कैश्चिच्च तालव्यतिकरचतुरैः कैश्चिदातोद्यनिष्णैः ।
वारस्त्रीणां कदम्बैर्मणिगणविलसद्भूषणोद्भासिताङ्गै-
र्हस्तिस्कन्धावरूढैरजनि निबिडिता राजधानी तदानीम् ॥१०४॥

अरुणकिरणमित्रैरुच्छ्रितैरातपत्रै-
श्चलितकनकदण्डोड्डामरैश्चामरैश्च ।
सुरसरिदभिमृष्टैः केतुपट्टैश्च जुष्टा
कमलकुमुदहंसैर्दीर्घिकेवाद्भुतद् द्यौः[40] ॥ १०५ ॥

गवाक्षमार्गेण निरीक्षमाणो
भूरिश्रियं भूरिवसोः कुमार्याः ।
सख्या समं विस्मयमाजगाम
गर्भेश्वरो[41] गर्भगृहे निलीनः ॥ १०६ ॥

अथ वेत्रपाणिनिवहेन दूरतो
विनिवेशितो विहितमण्डलो जनः ।
पुरदेवताभवन[42]गोपुराद्बहिः
करिणीकदम्बकविडम्बिताम्बुदः ॥ १०७ ॥

निषादितायाः करिराजवध्वाः
स्कन्धात् कुमारीमवरोप्य मन्दम् ।
लवङ्गिकादत्तकरावलम्बां
कामन्दकी देवगृहं निनाय ॥ १०८ ॥

---

40. °वाद्युतद्यौः. 41. गर्भेश्वरो. 42. परदेवता°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

भुजोरुनेत्रैः प्रसभं स्फुरद्भिः
स दक्षिणैर्दक्षजनाग्रगण्यः ।
आलिङ्गनाऽध्यासनदर्शनोत्कै-
राख्यायतानन्दमभीष्टलाभम् ॥ १०९ ॥

आपाण्डुशोभामवसन्नगात्रा-
माशाक्षयादाधिभिरर्द्यमानाम् ।
आसेदुषीं हर्षविषादयोगा-
दालोक्य तामाकुलतां स भेजे ॥ ११० ॥

प्रकाश्य सा माधवमन्तरस्थं
तस्योपकण्ठे तरुणीं निवेश्य ।
तत्साध्वसप्रोद्धरणाय वाणीं
कामन्दकी कामदुघा बभाषे ॥ १११ ॥

पुरश्चक्षूरागस्तदनु मनसोऽनन्यपरता
तनुग्लानिर्यस्य त्वयि समभवद्यत्र च तव ।
युवा सोऽयं प्रेयानिह सुवदने मुञ्च जडतां
विधातुर्वैदग्ध्यं विलसतु सकामोऽस्तु मदनः ॥ ११२ ॥

वचनानन्तरे तस्या मकरन्दोऽब्रवीदिमाम् ।
कुलकन्याविरुद्धोयामाचार इति शङ्किताम् ॥ ११३ ॥

त्वं वत्सलेति कथमप्यवलम्बितात्मा
सत्यं जनोऽयमियतो दिवसाननैषीत् ।
आबद्धकङ्कणकरप्रणयप्रसाद-
मासाद्यनन्दतु चिराय फलन्तु कामाः ॥ ११४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

इत्युक्तवचने तस्मिंस्तामवादील्लवङ्गिका ।
पितृधीलङ्घनत्रासप्रकटोत्कम्पशालिनीम् ॥ ११५ ॥

पितृवनमहीं निर्विण्णस्तां[43] पिशाचनिशाचर-
प्रमथनिविडां बभ्रामैकः प्रकाशितसाहसः ।
पतितमवधीत्[44] पाषण्डाख्यं च कृष्णचतुर्दशी-
रजनिसमये तस्यालोकान् सखी मम कम्पिता ॥ ११६ ॥

श्रुत्वा तेषामिति बहुविधान् साहसिक्योपदेशान्
बाष्पोत्पीडस्थगितनयनद्योतितान्तःप्रसादा ।
बन्धुद्वेषप्रतिकृतिभिया बद्धरोमाञ्चकम्पा
लिम्पन्तीव प्रणयसुधया लिङ्गिनीमालिलिङ्गे ॥ ११७ ॥

तातप्रीतिप्रचयपिशुनैस्तामवस्थाप्य वाक्यैः
पाणौ तन्वीं विकसितमुखीं पल्लवाभे गृहीत्वा ।
सख्युः सख्या अपि खलु तयोः सन्निधौ हर्षभाजा
वत्सेत्युक्त्वा पितृसवयसा माधवः संबभाषे ॥ ११८ ॥

एकं भूरिवसोरपत्यमथवा प्राणा बहिर्वर्तिनः
सामन्तोत्करशेखरीकृतपदद्वन्द्वस्य मन्त्रिप्रभोः ।
अस्माकं मनसो यदिष्टमथवा स्पष्टं समाधेः फलं
धात्रा चित्तभुवा मयाद्य भवते पित्राप्यसौ दीयते ॥ ११९ ॥

प्राजापत्यो विवाहोऽयं गान्धर्वेणोपबृंहितः ।
इति द्योतयितुं भूयो दम्पती तौ जगाद सा ॥ १२० ॥

---

43. त्वां. 44. पतितमवधीः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रेयो[45] मित्रं बन्धुता वा समग्रा
सर्वे कामाः संपदो[46] जीवितं वा ।
स्त्रीणां भर्ता धर्मदाराश्च पुंसा-
मित्यन्योन्यं वत्सयोर्ज्ञातमस्तु ॥ १२१ ॥

इत्युक्तौ तौ महाभागौ मालतीमाधवावुभौ
प्रीत्या जगृहतुस्तस्यास्तां वाणीं धर्मगर्भिणीम् ॥ १२२ ॥

पुनश्च माधवं प्रोचे पितृसब्रह्मचारिणी
बाष्पायमाणे बिभ्राणा वात्सल्यातिशयाद् दृशौ ॥ १२३ ॥

परिणतिरमणीयाः प्रीतयस्त्वद्विधाना-
महमपि तव मान्या हेतुभिस्तैश्च तैश्च ।
तदिह सुवदनायां तात मत्तः परस्मात्
परिचयकरुणायाः सर्वथा मा विरंसीः ॥ १२४ ॥

इति तामनुशोचतीमवोच-
न्मकरन्दो मकरन्दवर्षि वाक्यम् ।
मिथुने त्रपया गृहीतमौने
मनसा तद्भणितीमुपासमाने ॥ १२५ ॥

चरणाम्बुजयोस्तवाम्ब सेवा
फलिता नः प्रणतार्थकल्पवल्ली ।
तदिदं सचिवस्य तोकरत्नं
सुहृदे भूषणमर्पितं त्वयाद्य ॥ १२६ ॥

---

45. प्रभो. 46. Printed eds. of the मा. मा. read-शेवधिर्जी°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

उभयोरपि लोकयोः सुमित्रं
सह धर्मं चरतोस्त्वयोपदिष्टम् ।
गृहिणीगृहिणोर्गृहानुकूल्या-
दनयोर्हस्तगतो ननु त्रिवर्गः ॥ १२७ ॥

श्लाघ्यान्वयेति नयनोत्सवकारिणीति
निर्व्यूढसौहृदभरेति गुणोज्ज्वलेति ।
एकैकमेव हि वशीकरणं गरीयो
युष्माकमेवमियमित्यथ किं ब्रवीमि ॥ १२८ ॥

इति ब्रुवाणं मकरन्दमूचे
कामन्दकी कार्यविशेषदक्षा ।
त्वं मालतीवेषधरोऽभ्युपेहि
कर्तुं विवाहं मदयन्तिकायाः ॥ १२९ ॥

चूडामणिप्रभृतिकं चरणाङ्गुलीय-
पर्यन्तमाभरणजातमिदं गृहाण ।
एतद् दुकूलयुगलं च शुचीश्च माला-
श्चन्द्रातपद्युतिसमद्युति लेपनं च ॥ १३० ॥

इत्युक्त्वा सा प्रतीहारीहस्तात् प्रोक्तमदापयत् ।
सोऽपि तत् सर्वमादाय मालतीभूमिकां दधौ ॥ १३१ ॥

मालतीद्वयमवेक्ष्य तेऽहसन्
माधवप्रभृतयः सविस्मयाः ।
सङ्कटं न सुहृदो व्यचिन्तयत्
सिद्धया नियमितस्य माधवः ॥ १३२ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ माधवमभ्यधाच्च पूज्या
स भवान् पश्चिमतो विहारिकायाः ।
प्रियया सहितः प्रयातु धीमान्
महदुद्यानमपह्नुतार्कतापम् ॥ १३३ ॥

गाढोत्कण्ठकठोरकेरलवधूगण्डाच्छपाण्डुच्छटै-
स्ताम्बुलीपटलैः पिनद्धफलितव्यानम्रपूगद्रुमाः ।
कक्कोली[47]फलजग्धिमुग्धविकिरव्याहारिणस्तद्भुवो-
भागाः प्रेङ्खितमातुलुङ्गवृतयः प्रेयो विधास्यन्ति वाम् ॥१३४॥

तत्रैव तावत् स्थातव्यं त्वया दयितया सह
सखा ते यावदायाति गृहीत्वा मदयन्तिकाम् ॥ १३५ ॥

इत्यूचुषी सा मकरन्दमार्या
लवङ्गिकादत्तकरं गृहीत्वा ।
स्कन्धं समारोप्य करेणुकाया
विवाहलीलाविधये प्रतस्थे ॥ १३६ ॥

मालत्या सममथ माधवो मनीषी
संप्राप्तस्तदुपवनं विहारिकायाः ।
कान्तायाः करमयमग्रहीत् प्रवालं
मङ्गल्यं सुचिरमनोरथद्रुमस्य ॥ १३७ ॥

विलासिनीं व्रीडयतीं[48] विलोभयन्
विदग्धमुग्धैरवलोकनोदितैः ।
विहारिकोद्यानविहारमन्दिरे[49]
विभुः कृतार्थो विजहार माधवः ॥ १३८ ॥

---

47. तक्कोली. 48. व्रीलयतीं. 49. विहारिकोवा न°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

आलोलैरलकैरपह्नुतमुखीमाविस्फुरत्कुण्डला-
मारिश्लष्टामवकुण्ठनांशुकपटेनाश्यानचर्चारसाम् ।
आकल्पैर्नवरत्नकल्पघटितैरर्चिर्भिराच्छादिता-
मानिन्ये पितुरालयं भगवती मायामयीं[50] मालतीम् ॥ १३९ ॥

मत्तैर्हस्तिभिरर्दिता हयकुलैः संमर्दतो मर्दिताः
पादातैः समधिष्ठिताः सरभसैर्दौवारिकैर्घट्टिताः ।
द्वारे भूरिवसोर्महोत्सवधुरातात्पर्यपर्याकुलाः
खेदं निष्क्रमणप्रवेशविधयोः प्रापुः परं प्राणिनः ॥ १४० ॥

उदस्तमणितोरणं नवविचित्रचित्रोज्वलं
दुकूलपटपट्टिकारचितचारुचन्द्रोदयम्[51] ।
विशेषपरिभूषितैः परिजनैः परिद्योतितं
विमानमिव वैबुधं विरुरुचे वधूमन्दिरम् ॥ १४१ ॥

अथ नरपतिः[52] पद्मावत्याः प्रकाशितसौहृदो
निजविभवतो रत्नाकल्पैः प्रसाध्य च नन्दनम् ।[53]
करिकुलपतेः स्कन्धे चारोप्य वाद्यशतस्वनै-
र्बधिरितदिशं सद्यः[54] संवन्धिनो गृहमानयत् ॥ १४२ ॥

वध्वाः[55] सद्म प्रविशति वरे वानराभे सुजीर्णे
शेपुः केचित् तमतिचपलं भूपमेके निनिन्दुः ।
अन्ये कन्यापितरमपरे भागधेयं तदीयं
नानावृत्तैर्नगरगृहिणां नन्दनोऽभूद्विवर्णः ॥ १४३ ॥

---

50. मायामतीं. 51. पट्टिक...चारु°. 52. नृपपतिपद्मा°. 53. चन्दनम्. 54. बिम्बस्सं बन्धिनो Another emendation would be दिव्यं. 55. वध्यासद्म°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मधुरवचसि बाले माधवे मन्मथाभे
जयति गुणनिधाने श्रीमति ख्यातवंशे ।
वरमपरमयोग्यं प्रोद्यता[56] या वरीतुं
मतिरहह किमन्धा मालतीबान्धवानाम् ॥ १४४ ॥

मरणमपि वरं यद्धेपजं मानसार्ते-[57]
र्नतु परिणयलक्ष्मीरीदृशैर्नित्यशल्यम् ।
किमपरमभियुंक्ते वस्तु सौम्यं कृतान्तः
[58]किसलयमिव धत्तां केवलं दग्धुकामः (?) ॥ १४५ ॥

हृदयमतिकठोरं मालतीमातुरित्थं
दुहितरमथ मग्नां या हि पश्यन्त्युदास्ते ।
ऋजुमतिरथवा सा किं वराकी विधत्तां
पितरि दुहितृरत्नं क्काऽपि विक्रेतुकामे ॥ १४६ ॥

इत्थं सन्तप्तनाराचसवर्णा कर्णरन्ध्रयोः[59] ।
शृण्वन् वाचः पुरस्त्रीणां जामाताऽभ्यन्तरं ययौ ॥ १४७ ॥

अधितिष्ठति लोकसत्क्रियार्थं[60]
नृपतौ भूरिवसौ च बाह्यकक्ष्याम् ।
प्रतिहारनिपिद्धबन्धुवर्गः
प्रययौ कौतुकमन्दिरं स मन्दः ॥ १४८ ॥

---

56. प्रोद्यातानां वरीतं. 57. मानसा(न्ते)र्तं. 58. किसलय(मपि)मिव.
59. रन्ध्रयोःशृण्वन्. 60. लोकसत्क्रियार्थात्°

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

लवङ्गिकाद्या ललनाः प्रहासान्
यान् यानकुर्वन् मकरन्दनुन्नाः ।
तांस्ताञ्जडात्मा तरलः स्मरास्त्रैः
प्राबुद्ध सर्वान् प्रणयप्रयोगान् ॥ १४९ ॥

उपनीतमसौ पुरोधसा
मकरन्दस्य स पाणिमग्रहीत् ।
प्रचुराज्यसमिद्धपावक-
स्फुटधूमाकुलसाश्रुलोचनः ॥ १५० ॥

पुलकतिलकितप्ररूढकम्प-
श्रमजलशीकरकोरकायिताङ्गः ।
प्रकटितविकृतिः [61]स्मरेण वृद्धः
परिजहसे परितः प्रियासखीभिः ॥ १५१ ॥

परिणीय मनोरथप्रियां
परिवारेण लवङ्गिकादिभिः ।
निजवेश्म निनाय निर्वृतः
प्रतियातां मदयन्तिकादिभिः ॥ १५२ ॥

वधूवरौ वासगृहं निवेश्य
वधूं च धर्म्यैरनुशिष्य वाक्यैः ।
आमन्त्र्य जामातरमात्तपूजा
कामन्दकी स्वावसथं जगाम ॥ १५३ ॥

---

61. विकृति स्मरेण.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

परिचुम्बितुमाननाम्बुजं तत्
परिरब्धुं च दृढं पयोधरौ तौ ।
तरसा निपतन् प्रविश्य पल्ड्यां
मकरन्देन महीतले निरासे ॥ १५४ ॥

कौमारे यदि कुलटामिमां[62] स्पृशेयं
गच्छेयं गतिमधमां शपे गुरुभ्यः ।
इत्युक्त्वा स तु कुपितो विलक्षचेता
निर्यातः प्ररुदितदुर्मुखो निकेतात् ॥ १५५ ॥

प्रसङ्गतोऽथ प्रिय[63]बुद्धरक्षिता
पतिद्विपं [64]भर्त्सय मालतीमिति ।
समानयत् तां मदयन्तिकां शनै-
र्मृषाप्रसुप्तस्य विटस्य सन्निधिम् ॥ १५६ ॥

लवङ्गिकाऽऽह तां सुप्तां प्रबोधयितुमुद्यतां ।
चिरमुद्वेजिता भर्त्रा क्षणं निद्रात्वसाविति ॥ १५७ ॥

तव प्रतीपं हि लवङ्गिके वचः[65]
तथैव गाढं मम कोपितोऽग्रजः ।
[66]सहासिकायां परभावया[67] स्त्रिया
रतिर्भुजंग्येव रहः कुतो नृणाम् ॥ १५८ ॥

---

62. कुलदा°. 63. प्रसंगतोऽथ बुद्ध°. 64. मत्सम°.
65. लवंगिके व तथैव. 66. सहाऽस्ति का वा is perhaps better than सहासिकायां. आसिका, sitting–Apte's Prac. Sk. Eng. Dic.
67. परभागया.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

ननु प्रवादो नगरे विजृम्भते
स[68] मालतीमाधवयोर्द्वयोरिह[69] ।
इतीममाकर्ण्य विशङ्कितो गुरु-
र्वचोभिरेनामदुनोदरुन्तुदैः[70] ॥ १५९ ॥

मयापि दृष्टं ननु शङ्करालये
परस्परं प्रेम परार्ध्यमेतयोः ।
प्रयाणमन्यच्च मयाधुना स्मृतं
सुनिश्चितं कृष्णचतुर्दशीदिने ॥ १६० ॥

तस्मिन् दिने मम तरक्षुवशं गतायाः
प्राणप्रदातरि चिरप्रतिपन्नसंज्ञे ।
दिष्ट्याऽभिवर्धितवती दयितं सखी ते
तेनार्चिता च हृदयेन च जीवितेन ॥ १६१ ॥

इति तां ब्रुवतीं स्मराकुला-
मवतीर्णां स्वमनीषिते स्थले ।
स्मयमानमुखी लवङ्गिका
प्रकृतं प्रस्मरयन्त्यभाषत ॥ १६२ ॥

कोयं जनः कुवलयाक्षि कुतूहलं न-
स्तत्कथ्यतामिति लवङ्गिकयाऽनुबद्धा[71] ।
प्राह स्म सस्मितमुखी स्मर तं स्मराभं
नाहं क्षणेक्षितममुं कलयामि नाम्ना ॥ १६३ ॥

---

68. न. 69. द्वयोरिव. 70. मनुनोदरु°. 71. नुबद्ध:°

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रशिथिलकचबन्धां प्रस्खलन्तीं पतन्तीं
प्रबलभयविहस्तां[72] भृत्यवर्गैर्निरस्ताम् ।
[73]मृदुमतिरनुपाधि प्राप्य यो मंक्षु दत्वा
मृगपतिबलिमस्मै मृत्यवे मामुदस्थात्[74] ॥ १६४ ॥

इत्युक्त्वां विरतां बालामाबभाषे लवङ्गिका ।
म[75]याऽधुना स्मृतः श्रीमान् मकरन्दो ह्यसाविति ॥ १६५ ॥

प्रियाभिधानश्रवणामृतेन
प्रमोदमानां पुलकाचिताङ्गीम् ।
परामृशन्ती परिहासपूर्वं
लवङ्गिका तां ललितं ललाप ॥ १६६ ॥

वयं तथा नाम यथात्थ किं वदा-
म्ययं[76] त्वकस्माद्विकलः कथान्तरे ।
कदम्बगोलाकृतिमाश्रितः कथं
विशुद्धमुग्धः कुलकन्यकाजनः ॥ १६७ ॥

अनुप्रविष्टा किल बुद्धरक्षिता
जगाद तां जर्जरितत्रपां शनैः ।
प्रकाशिताः स्मो वयमञ्जसाऽनया
प्ररूढविश्रम्भकथाभिरास्महे ॥ १६८ ॥

---

72. °विहस्ताद्धृत्य°. 73. स्मृतिमृदुमति°. 74. °मुदस्थाम् । उदस्थात् is अन्तर्भावितण्यर्थः, उदतिष्ठिपद् इत्यर्थः । 75. ममाधुना°. 76. °म्यहं.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रेरिता प्रियसख्येत्थं प्रेमविश्रम्भगर्भितम् ।
मकरन्दार्पितां ताभ्यां स्मरार्तिं स्वामवर्णयत् ।। १६९ ।।

दयितावदनारविन्दवान्तं
मकरन्दो मकरन्दमालिहानः[77] ।
मधुलेह इवोन्मदिष्णुरुच्चै-
र्मधुरिम्णा न स तृप्तिमाससाद ।। १७० ।।

अथ तामुभे शपथपूर्वमूचतु-
र्यदि दैवतस्तव समीपमेत्य सः ।
तरसा ग्रहीष्यति करं स्मरातुरः
प्रतिपत्तिरत्र[78] तव का प्रकाश्यताम् ।। १७१ ।।

निश्वस्य दीर्घमथ सा निभृतं जगाद[79]
का वाऽहमस्य खलु तस्य कलेवरस्य ।
तेनैव रूढगुणगौरवमात्मदेहं
प्रत्यर्प्य यन्निरुपयोगमपि प्रतीष्टम् ।। १७२ ।।

इति तद्वचनं निशमय्य मुदा
परिरभ्य ननन्दतुरिन्दुमुखीम् ।
स्मर वाचमिमामिति नीतिपरे
दृढतामपि निन्यतुरुक्तमुभे ।। १७३ ।।

77. °मालिहानम्. 78. °रत्र°. 79. जगाम.

२

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

तां चिरायितमिति प्रलपन्तीं
जापितः किमपि नाटितबोधः ।
न्यस्य दूरमवकुण्ठनमाराद्
अग्रहीत् करतले मकरन्दः ॥ १७४ ॥

मालतीमनभिवीक्ष्य मानिनी
माधवीव मलयानिलाहृता ।
साध्वसेन तरलत्रपावशा-
न्मन्दहासकुसुमं व्यचीकसत् ॥ १७५ ॥

गुरुजनपरिशङ्कातङ्कसङ्कोचिनीं तां
वरगुणपरिणाहान्वर्णयन्त्यौ[80] वचोभिः ।
स्मर सखि गिरमुक्तामद्य चेति ब्रुवाणे
निजमनसि वयस्ये स्थापयामासतुस्ते ॥ १७६ ॥

उद्वाहोत्सवसङ्कुलाऽखिलजनादुद्भ्रान्तदौवारिकात्
पक्षद्वारपथेन नन्दनगृहान्निर्गत्य कान्तां हरन् ।
प्रागिन्दोरुदयात् तमोभरमिलत्कालेयधूपोच्चयां
वीथीं प्राप विलासिपौरमदिरागोष्ठीभिरामोदिताम् ॥ १७७ ॥

अविरलतरदीपत्रासितध्वान्तमारा-[81]
दतिपटुपटहौघध्वानसंपूरिताशम् ।
अनिभृतगति कन्यारत्नहर्तुः पुरस्ताद्
अनिलनिभमनीकं रक्षिणामाविरासीत् ॥ १७८ ॥

80. परिणाहावर्ण॰ 81. ॰त्रासित॰

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मालतीवेषसंच्छन्नं हरन्तं मदयन्तिकाम् ।
विदित्वा मकरन्दं ते जजल्पुः पुररक्षिणः ॥ १७९ ॥

मैथिलीमिव पुलस्त्यनन्दनो
नन्दनस्य भगिनीं हरन्नसौ ।
नन्दयोरिव (?) नरेन्द्रमन्त्रिणोः
संदधाति परमं पराभवम् ॥ १८० ॥

असौ पटुर्मालतिवेषधारी[82]
प्रतारयन् नन्दनमार्यबुद्धिम्[83] ।
महात्मनो भूरिवसोः समक्ष-
महारयत् तामपि माधवेन ॥ १८१ ॥

वध्यतां वध्यतामेष च्छिद्यतां भिद्यतामिति ।
अभ्ययुञ्जत ते वीरं पञ्चास्यमिव कुञ्जराः ॥ १८२ ॥

चरितं चरितुं प्रियस्य सख्युः
कलहंसः प्रहितोऽथ माधवेन ।
महिलाः परिगृह्य संकुलेऽस्मिन्
सहसा माधवसन्निधिं निनाय ॥ १८३ ॥

मदयन्तिकां सहचरीद्वयान्वितां
पुरतो विलोक्य सहसैव मालती ।
अथ दिष्टिवृद्धिवचसाऽधिनोत् प्रियं
वकुलावलीविहितपारितोषिका ॥ १८४ ॥

---

82. Both the forms, मालती and मालति are noted in the Dic. Here मालति is used for the usual मालती, obviously for the sake of metre. 83. प्रत. प्रा°

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ निजसुहृदो निशम्य वृत्तं
प्रियतमया प्रणयान्निवार्यमाणः ।
सरभसमभिधाव्य[84] तत्समीपं
न्यविशत दोर्बलधूतमार्गलोकः ॥ १८५ ॥

कलकलमुपकर्ण्य कर्णतोदं
किमिदमिति प्रतिहारमाशु पृष्ट्वा ।
तदुदितमकरन्दकूटवृत्तः
परिकुपितो बलमादिशन्नरेन्द्रः ॥ १८६ ॥

ततो विशदचन्द्रिकाभरपटीरपङ्काङ्कितां
समुन्मिषिततारकाकुसुमकोरकालंकृताम् ।
दिदृक्षुरिव[85] तद्रणं दिवमुपागतश्चन्द्रमाः
समृद्धनिजमण्डलः सपदि चन्द्रशालां नृपः ॥ १८७ ॥

ततः प्रववृते तयोरतिभयङ्करः सङ्गरः
पुरातन[85A]मुनीन्द्रयोर्बदरिकामिवाध्यूपुषोः[86] ।
विमुक्तविविधायुधक्षयविपण्णडम्भोद्भवैः
समं बहुतरैर्बलैः समरकेलिकौतूहलैः ॥ १८८ ॥

पदाघातैः कांश्चित् कतिचिददयैर्बाहुहननैः
प्रकोष्ठांशैः कांश्चित् कतिचन घनैरूरुघटनैः ।
असङ्गादाच्छिन्नैः कतिचन तदीयैः प्रहरणैः
भटंमन्यान् सैन्यान् भयतरलतां निन्यतुरुभौ ॥ १८९ ॥

---

84. °मभिधाव्य°. 85. दिदृक्षुरधिकं रणं. 85A. पुराकृत.
86. °मिवाध्यूषुषोः.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

प्रहरणममुचन् प्रपेतुर्धरण्यां दिशो दुद्रुवुः
क्षतभवमवमन् विलेपुः सशोकं मुमूर्छुश्चिरम् ।
शरणमुपययुस्तवास्मीति रेटुर्जहुर्जीवितं
प्रतिभटपुरुषा रुषा मोहिताभ्यामुभाभ्यां क्षताः ॥ १९० ॥

अथ नरपतिर्ज्योत्स्नाजालैरनर्गलनिर्गमै-
र्दिन इव[87] च विस्पष्टं दृष्ट्वा विचेष्टितमेतयोः ।
मुदितहृदयो[88] वीरश्लाघी निवार्य बलान्युभौ
निजसचिवयोरग्रे [89]द्वाःस्थैः स्वसन्निधिमानयत् ॥ १९१ ॥

सूर्याचन्द्रमसाविव द्युतिभरैर्दस्राविवाकारतः[90]
स्थित्या मेरुहिमालयाविव धिया दैत्यामरेज्याविव ।
दृष्ट्वा तावुपजातविस्मयरसः श्रुत्वाऽभिजात्यं ततः
प्रोचे मन्त्रिवरौ वरौ सुचरितौ लब्धौ भवद्भ्यामिति ॥१९२॥

वैलक्ष्यात्तौ पुनरपि निजौ मन्त्रिणौ चाऽप्रसन्नौ
ज्ञात्वा वाक्यैः प्रणयसरसैर्भूयसा सान्त्वयित्वा ।
सत्कृत्यैतावपि गुणगणे दर्शयन् पक्षपातं
प्रायादन्तःपुरमथ च तौ जग्मतुः स्वं निकेतम् ॥ १९३ ॥

अग्रहीद् गुणमस्माकमपराधे महत्यपि ।
अहो सौजन्यसर्वस्वसंकेतसदनं नृपः ॥ १९४ ॥

---

87. इव विस्पष्टं. 88. मुदितहृदयवीर°. 89. द्वारेस्थस्सन्निधि°.
90. दस्रैरिवा°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

इति क्षितीशं बहुमन्यमानो
जगाद मित्रं पथि दैत्यरातिः।
प्रियासमक्षं हरणप्रवृत्तिं
श्रोष्यामि सख्या मदयन्तिकायाः ॥ १९५ ॥

कथयति त्वयि सस्मितमालती-
वलितलोलकटाक्षपराहतम्[91] ।
वदनपङ्कजमुल्लसितत्रपा
स्तिमितदृष्टि सखी नमयिष्यति ॥ १९६ ॥

इति मनोरथमुद्धतमुद्वहन्
न खलु यावदसौ गृहमाविशत् ।
समरतत्त्वनियुक्तजना क्षणं
किमपि तावदवास्थित मालती ॥ १९७ ॥

अन्तरेऽत्र विवरानुसारिणी
पूर्ववैरपरिहारकांक्षया ।
भैरवीव पुरतो मृगीदृशः
प्रत्यदृश्यत कपालकुण्डला ॥ १९८ ॥

मम गुरुरभिजघ्ने माधवेन त्वदर्थं
तदहमपि तवास्रैस्तस्य[92] कुर्वे निवापम् ।
उपचितदृढवैरा साऽहमेकस्य हेतो-
रुभयकुलनिबद्धां गाढमुत्सादयामि ॥ १९९ ॥

---

91. वलाहक:.   92. तदहमिति पितास्रैस्तस्य.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

त्वद्वत्सलः क्व नु तपस्विजनस्य हन्ता
कन्याविटः पतिरसौ परिरक्षतु त्वाम् ।
श्येनावपातचकिता नववर्तिकेव[93]
किं चेष्टसे ननु चिरात् कवलीकृतासि ॥ २०० ॥

इति संतर्ज्य तां बालां बलादुत्क्षिप्य खेचरी ।
क्रन्दन्तीमार्यपुत्रेति श्रीपर्वतमुपानयत् ॥ २०१ ॥

कवलयितुं ततः शशिमुखीं धृतशूलवरा
प्रकटितदंष्ट्रिका शशिकलामिव राहुतनुः ।
प्रसभमियेष सा [94]तदवलोक्य रुरोद भृशं
भगवति मामवेति दुहिता बत भूरिवसोः ॥ २०२ ॥

आक्रन्दनं भगवतीति मुहुर्मुहुस्तत्
कामंदकीति च निशम्य समीपसंस्था ।
सौदामिनी द्रुतमुपेत्य ददर्श बालां
बाष्पैः समं निपतितां वनदेवतानाम् ॥ २०३ ॥

निर्भर्त्स्य वत्सलतरा पिशिताशनां तां[95]
दृष्ट्योर्द्वयेन कुचयोश्च पयः क्षरन्ती ।
आश्वास्य वाग्भिरधिरोप्य निजाङ्कशय्यां
स्वीयं निनाय भवनं श्रुतपूर्ववृत्ता ॥ २०४ ॥

---

93. Vide जगद्धर's Com. नववर्तिकेत्यपि पाठः. 94. स तामवलोक्य.
95. पिशिताशनानां.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथाविवेशोपवनं स माधवः
स्फुरद्भिरङ्गैः परिरम्भलम्पटैः ।
दिदृक्षमाणस्त्वरितेन चेतसा
जयश्रियं मूर्तिमतीमिव प्रियाम् ॥ २०५ ॥

भुजेन वामेन समं परिस्फुरत्
प्रकाशयत् [96]प्राणसमामपेयुषीम् ।
उपेयुषस्तस्य विहारदीर्घिका-
मदक्षिणं चक्षुरभूददक्षिणम् ॥ २०६ ॥

ततो गिरं मालति मालतीति
शुश्राव दूरान्मदयन्तिकायाः ।
लवङ्गिकायाश्च विषादभाजो-
रन्वेषयन्त्योरभितो वयस्याम् ॥ २०७ ॥

क नु मालती क नु कुलस्य भूषणं
क नु मे प्रिया क नु मदीयजीवितम् ।
क नु मद्विलोचनचकोरचन्द्रिका
क नु तद् गृहीतममृतं भवाम्बुधेः ॥ २०८ ॥

[97]अनुमितमनिमित्तैश्चेतसा शंकितं प्राक्
प्रकटमिव भवत्योरद्य वाचामशक्त्या[98] ।
व्यसनमुपगतं मे निष्प्रतीकारमेतद्
गलति न च कठोरं जीवितं हा हतोऽस्मि ॥ २०९ ॥

---

96. प्राणसमानवीयसीम्. 97. अनुमितिमनुमित्तैः°. 98. वाचारुशक्त्या

CC-0. Prof. Şatya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अयि सखे मकरन्द निरूप्यतां
प्रियसखी तव कुत्र गता भवेत् ।
भगवतीभवने यदि युज्यते
न पुनरत्र गमिष्यति सैकिका ॥ २१० ॥

इत्थं सखीभिरनुयायिभिराप्तवर्गै-
रन्वेषयन्नुपवने भवने वने च ।
नापश्यदुत्सुकमना दयितां यदाऽसौ
संमूर्छितो भुवि तदा न्यपतन्निराशः ॥ २११ ॥

संज्ञामवाप्य मकरन्दमुखप्रयत्ना-
दभ्युत्थितः पुनरवेक्ष्य जगत् स शून्यम् ।
व्रीडां विहाय विललाप तथा विलासी
श्रुत्वा यथा दृषदपि द्रवतां प्रपेदे ॥ ॥ २१२ ॥

यः पूर्वं स्पृहणीयतामुपगतो भुक्तः समं कान्तया
तं देशं परिहृत्य हृन्नयनयोः सन्तापसन्तानदम् ।
निर्विण्णो हृदये सुनिर्घृण इव त्यक्त्वा स्वबन्धून् बृहद्-
द्रोणीशैलवनं सुपावनमगात् सख्या समं माधवः ॥ २१३ ॥

तत्रोन्मादवशां दशामुपगतस्तस्याः प्रवृत्तिं वने
पृच्छंस्तत्र मृगान् खगान् विटपिनो भृङ्गान् भुजङ्गानपि ।
नष्टोऽयं परिहास इत्यपि वदन् कान्ते त्वमाप्ता मये-
त्यालिङ्गन् दयितां मनोरथमयीं प्राणान् कथंचिद् दधौ ॥ २१४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

आर्तो भूरिवसुर्निशम्य तनयामत्यन्तमन्तं गता-
मर्थिभ्यो[99] द्रविणं विधाय विपुलं क्षेत्रं तथा पात्रसात् ।
आलोलान् विषयानुदर्कविरसानालोच्य शोच्यानिमान्
आनम्रौ नृपनन्दनावगणयन् प्रायादरण्यस्थलीम् ॥ २१५ ॥

अन्तःशल्यनिभान् अकल्यहृदयस्त्यक्ष्यन्नसूनात्मनो
निश्चिन्वन् विधिना च वह्निपतने धर्मस्य निर्बाधताम् ।
संभेदे भृशपावने मधुमतीसिन्धोरयं भावुकं
ख्यातं प्राप सुवर्णबिन्दुमवनौ खण्डेन्दुचूडामणिम् ॥ २१६ ॥

विपदमथ विदित्वा देवरातः स्नुषाया-
स्तदुपहितमवस्थादौस्थ्यमप्यात्मसूनोः ।
विरतविषयसङ्गः सोऽपि निश्चित्य मर्तुं[100]
पशुपतिमुपतस्थे भूरिवस्वाश्रितं तम् ॥ २१७ ॥

लवङ्गिकाद्याभिरनुप्रयाता
कामन्दकी कामितदेहमोक्षा ।
वनं ययौ वीक्ष्य सुहृत्कुलं त-
न्निरीक्षितं निष्करुणेन धात्रा ॥ २१८ ॥

अथ मृगदृशा नुन्नाऽऽसन्नान् प्रबोधयितुं निजान्
प्रियमपि समानेतुं विद्याबलादपि जीवितम् ।
चिरपरिचितं चिह्नं संगृह्य केसरमालिकां
समचरत सा व्योम्ना सौदामिनी लघुगामिनी ॥ २१९ ॥

---

99. अर्थित्वाद्र°. 100. मूर्तिं.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पाथोदानां पथि परिचिते पावनैर्गन्धवाहै-
र्मन्दाकिन्याः पयसि लुठितैर्मन्दमासेव्यमाना ।
पद्मावत्याः परिसरमगान्माधवस्यात्र वृत्तं
श्रुत्वा प्रायाद् वनभुवमसौ यत्र मित्रानुयातः ॥ २२० ॥

दिवि स्थिताऽवेक्षत मूर्च्छितं तं
मर्तुं च सृष्टं मकरन्दमार्त्या ।
अम्भोभिराश्वासयदभ्रियैस्तं
न्यवर्तयत् तत्सुहृदं च मृत्योः ॥ २२१ ॥

अथ च बकुलमालां माधवाय प्रदाय
प्रियमपि विनिवेद्य प्रेयसीवृत्तमस्मै ।
गगनमुदपतत् सा विद्यया नन्दयन्ती
रसमिव धरणिस्थं भानवीरश्मिमाला ॥ २२२ ॥

श्रीपर्वतं लघुतया गमितेन तेन
संजीवनौषधिरवेक्ष्यत जीवितेशा ।
आवेगतस्तमवलोक्य पपात दूरा-
दाप्लुत्य साऽपि हृदये हृदयेश्वरस्य ॥ २२३ ॥

परस्परं तौ परिरभ्य दुःखिता-
वचिन्तितासादितदर्शनोत्सवौ ।
विमुक्तकण्ठं चिरमश्रु वर्षता
विलीयमानाविव शोकवह्निना ॥ २२४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ तावनुनीय लोकवृत्तै-
रितिहासैश्च दृढं प्रसाद्य सिद्धा ।
निजसिद्धिबलेन पूजनीयौ
भृशमानर्च विभूषणांशुकाद्यैः ॥ २२५ ॥

सह तौ निजदेशमानयन्ती
गगनस्थैव ददर्श भृत्यदारैः ।
पितरावनयोः प्रवेष्टुकामौ
हुतमग्निं पुरतः सुवर्णविन्दोः ॥ २२६ ॥

प्रापय्य तौ सपदि चीवरिणीसकाशं
सौदामिनी द्रुतमुपेत्य सुवर्णबिन्दुम् ।
दिष्ट्यो[101]ऽभिवर्ध्य सचिवौ परिदीप्तमग्निं
बाह्यं क्षणेन निरवापयदान्तरं च ॥ २२७ ॥

शैलप्रपातात् पतितुं कृतोद्यमाः
पवित्रतोयामथ पाटलावतीम् ।
प्रव्राजिकाद्या ददृशुर्दिवश्च्युतौ
चित्रां[102]शशाङ्काविव तौ वधूवरौ ॥ २२८ ॥

मालतीमाधवौ दृष्ट्वा पुनर्जाताविव श्रियः ।
प्रत्याश्वसुर[102A]द्विजन्यः प्रातःसन्ध्यारुणाविव ॥ २२९ ॥

---

101. दिष्ट्याहिवर्द्ध. 102. मरवा°. Can it be for मघा°? But it would be unpoetic to use मघा in this connection, for, this lunar mansion contains five stars, whereas चित्रा contains one only. Cf. हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव–रघु• I. 46. 102A. अजिन्यः.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

उत्थाप्य पादपतितामुपगूह्य गाढ-
माघ्राय मूर्ध्नि चिरमस्रजलाविलाक्षी ।
प्रव्राजिकाऽऽशिषमयुक्त शतं समानां
जीव त्वमिन्दुमुखि जीवय चात्मबन्धून् ॥ २३० ॥

महिलासहितः समेत्य हर्षा-
न्मकरन्देन सुहृत् समाबभाषे ।
क नु सा बत योगिनी विनष्टा
कुलमभ्युद्धृतमापदो ययेति ॥ २३१ ॥

अस्मिन् क्षणे सकरुणैः
सचिववरौ देवरातभूरिवसू ।
सुतदुहितृविरहविधुरौ
विशतोऽनलमिति वनेचरैः शुशुचे ॥ २३२ ॥

वनचरवचनं तद् वज्रपातोपमेयं
सपदि निशमयन्तौ मालतीमाधवश्च ।
स्फुरितविषममोहौ भूतले संपतन्तौ
पुनरपि च सखीभिर्धारितौ व्याकुलाभिः ॥ २३३ ॥

मम खलु वचसा तौ जीवितौ मन्त्रिमुख्या-
विति गिरममृतौघां कालिकेवोद्गिरन्ती ।
दिवमनु ददृशे तैर्दीप्यमाना स्वभासा
विधुरितजनरक्षोद्योगिनी[103] योगिनी सा ॥ २३४ ॥

---

103. दक्षेद्योगि॰

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

तत्प्रत्ययाद् विधुरितौ परिबोध्य वत्सौ
तद्दर्शनेन तपसि प्रयतोत्सुका[104] सा ।
कामन्दकी समुपसृत्य तथा ववन्दे
सौदामिनी नमति वः परिचारिकेति ॥ २३५ ॥

अथ तां मालती दृष्ट्वा बभाषे घटिताञ्जलिः ।
हर्षगद्गदया वाचा मोदयन्ती सखीजनम् ॥ २३६ ॥

कपालकुण्डलाकोपदुर्जातजनितापदः ।
वयं सर्वेऽनया कृच्छ्रादार्ययाऽभ्युद्धृता इति ॥ २३७ ॥

युष्मत्परिचयस्नेहादार्यया रक्षिताऽस्म्यहम् ।
इति तद्वचसा शिष्यां लिङ्गिनी बह्वमन्यत ॥ २३८ ॥

एह्येहि भूरिजनजीवितदानपुण्य-
संभारधारिणि चिरादसि हन्त दृष्टा ।
दत्तप्रमोदमपि नन्दय मे शरीर-
मालिङ्ग्य सौहृदनिधे विरम प्रणामात् ॥ २३९ ॥

वन्द्या त्वमेव जगतः स्पृहणीयसिद्धि-
रेवंविधैर्विलसितैरतिबोधिसत्त्वैः ।
यस्याः पुरापरिचयप्रतिबद्धबीज-
मुद्भूतभूरिफलशालि विजृम्भते नः ॥ २४० ॥

---

104. तपसितोत्सुका सा.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

उक्त्वेति संभ्रमवती स्वयमुत्थिता ता-
मुत्थाप्य पादविनतामुपगूह्य गाढम् ।
आघ्राय मूर्धनि हठादुपवेश्य पार्श्वे
पप्रच्छ साधु कुशलं चिरकालदृष्टाम् ॥ २४१ ॥

अत्युदारमनिमित्तमद्भुतं[105]
तद् विचिन्त्य सुकृतं तया कृतम् ।
प्राहतुः स्म मकरन्दमाधवौ
तत्प्रसादपरिलब्धजीवितौ ॥ २४२ ॥

अपि चिन्तामणिश्चिन्तापरिश्रममवेक्षते ।
इदं त्वकृतमन्येन कृतमाश्चर्यमार्यया ॥ २४३ ॥

[106]लवङ्गिका तां मदयन्तिका च
प्रणेमतुः प्रार्थिततत्प्रसादे ।
आशीर्भिरभ्यर्च्य तपस्विनी ते
मान्यश्रियं माधवमित्युवाच ॥ २४४ ॥

---

105. °मभूतं, but this goes against the metre of the Stanza.

106. This stz. is very corrupt in the transcript, where it reads as follows—

लवङ्गिका तां मदयन्तिकापणे
............यत्प्रार्थिततत्प्रसादे ।
आशीर्भिरभ्यर्च्य तपस्विनी ते
मान्याश्रियं माधवमित्युवाच ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अघोरघण्टः स कपालपाणि-
रायुष्मतायो निहतोऽपराद्धः ।
अन्तेवसन्त्या ननु तस्य वैरा-
दस्माकमुच्चैर्जनितेयमापत् ॥ २४५ ॥

आर्यस्य कुण्डिनपतेस्तव च प्रसोतु-
रग्रे च भूरिवसुनन्दनयोः करे मे ।
आयुष्मतः प्रहितमद्य कृतप्रसादं
पद्मावतीपरिवृढेन विलिख्य पत्रम् ॥ २४६ ॥

इत्युक्त्वा दर्शितं पत्रं योगिन्या समयज्ञया ।
गृहीत्वाऽवाचयत् प्रीत्या मकरन्दो महामतिः ॥ २४७ ॥

श्लाघ्यानां गुणिनां धुरि स्थितवति श्रेष्ठान्ववाये त्वयि
प्रत्यस्तव्यसने[107] महीयसि परं प्रीतोऽस्मि जामातरि ।
तेनेयं मदयन्तिकाऽपि भवतः प्रीत्यै तव प्रेयसे
मित्राय प्रथमानुरागघटिताऽप्यस्माभिरुत्सृज्यते ॥ २४८ ॥

इति वाचिके स्फुटमनेन वाचिते
सकलस्य माधवजनस्य मानसम् ।
प्रससाद शङ्कितविरोधविच्युते-
र्मधुवैरिनाम्नि वचसेव कीर्तिते ॥ २४९ ॥

अवलोकिता तदनु बुद्धरक्षिता
कलहंसकश्च ननृतुः प्रमोदतः ।
मदयन्तिकादिभिरथाऽनुसन्दधे
मधुवैरिणः प्रकरणस्य चित्रता ॥ २५० ॥

---

107. प्रत्यस्थ°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

सौदामिनी च तामूचे तदिदं रामणीयकम् ।
तस्मिन् प्रकरणे गूढे चमत्कारवती यतः ॥ २५१ ॥

अमात्ययोः प्रीतियुजोर्मदग्रे
समग्रविद्याग्रहणावसाने ।
अपत्यसंबन्धविधिप्रतिज्ञा
पुरातनी सम्प्रति पूरितेयम् ॥ २५२ ॥

माधवोऽथ निजगाद लिङ्गिनीं
श्रोतुमम्ब कुतुकं विजृम्भते ।
वस्तुवृत्तमिदमन्यथा यतः
प्रोक्तमेतदपि चाऽन्यथाऽनया ॥ २५३ ॥

गुरुषु गुरुकुलेषु श्रावकावस्थया द्वौ
प्रणयविवशचित्तौ तौ यदास्तां तदानीम् ।
अजनि सचिवयोः स्वापत्यसंबन्धसंविद्
भवति परमभिज्ञा तत्र सौदामिनीयम् ॥ २५४ ॥

पौरिका[108]..............परिण
यमाशीर्भिरतिसंहितौ युवाम् । (?)
तत् तु संवरणमन्यथा भवे-
न्नन्दनस्य नृपतेश्च विक्रिया ॥ २५५ ॥

---

108. The first two lines are defective; they read thus :—
पौरिका..............परिण-
यमाशीर्भिरतिसंहितौ युवाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

इति जिनव्रातिनीवचनेन ते
स्फुरितविस्मयहासलसन्मुखाः ।
अतिगभीरमबाधितमद्भुतं
मतिमतां चरितं बहु मेनिरे ॥ २५६ ॥

अथ सर्वतः कृतार्थं माधवमानन्दसागरे मग्नम् ।
सफलनिजयत्नमुदिता जगाद कामन्दकी वचनम् ॥ २५७ ॥

यत्प्रागेव मनोरथैर्वृतमभूत् कल्याणमायुष्मतो-
स्तत्पुण्यैर्मदुपक्रमैश्च फलितं क्लेशोऽपि मच्छिष्ययोः ।
निष्णातश्च समागमोऽपि विहितस्त्वत्प्रेयसः कान्तया
संप्रीतौ नृपनन्दनौ यदपरं प्रेयस्तदप्युच्यताम् ॥ २५८ ॥

इत्यूचुषीं किंस्विदितः प्रियं स्या-
दित्यादिकैस्तामभिनन्द्य[109] वाक्यैः ।
तया समेतोऽनुगतः सखीभिः
पुरं प्रतस्थे ससुहृत्सबन्धुः ॥ २५९ ॥

निबद्धकेतुं निनदन्मृदङ्गां
पौराङ्गनाभिः परिवृष्टपुष्पाम् ।
पद्मावतीमेत्य समृद्धकामौ
वधूसमेतश्च गुरू ववन्दे ॥ २६० ॥

नन्दनेन मकरन्दबन्धुना
भूभृताऽपि च गुणाभिनन्दिना ।
मानितः श्वशुरयोर्महोत्सवं
मासमावहत मालतीपतिः ॥ २६१ ॥

---

109. दि॰ ...यैः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

माधवोऽथ मकरन्दसंयुतो
मालती च मदयन्तिकान्विता।
प्राप्य कुण्डिनमखण्डितोत्सवं
प्रश्रयेण पितरौ प्रणेमतुः ॥ २६२ ॥

वधूसहायस्य वरस्य मङ्गले
पुरप्रवेशे पुरुहूततेजसः।
प्रसन्नतां मन्त्रिवरे प्रकाशयन्
विदर्भराजो विदधे महोत्सवम् ॥ २६३ ॥

अभिमतधनराशिप्राप्तिसंजाततोषै-
रवनिसुरसमूहैराशिषा वर्ध्यमानः।
अविरलमनुतिष्ठन् पञ्चयज्ञान् स्वगेहे
सममरमत दारैः प्रीणयन् बन्धुवर्गम् ॥ २६४ ॥

पद्मावतीं कुण्डिनतः कदाचिन्
परापतन् पद्मपुरीं कदाचित्।
नित्यं[110] सुखानां सह धर्मपत्न्या
कोटिं परामन्वभवत् कुमारः ॥ २६५ ॥

प्रकटितमिति पद्यैरञ्जसा बालिशानां
सुकुटिलमितिवृत्तं मालतीमाधवाख्यम्।
दिशतु सहृदयेभ्यो दीर्घमानन्दमुद्रां
कृतिरियमृजुलघ्वी पूर्णसारस्वतस्य ॥ २६६ ॥

॥ इति ऋजुलघ्वी समाप्ता ॥

---

110. पत्न्या

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

INDEX I

ऋजुलघ्वी

अकारादि–वर्णानुक्रमेण श्लोकसूची

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

९९	गतिश्रुता सा गगने	वंशस्थम्
१०६	गवाक्षमार्गेण निरीक्षमाणः	उपजातिः
९०	गत्वा हठात् पुनरपश्यद्०	वसन्तति०
१३४	गाढोत्कण्ठकठोरकेरलवधू०	शार्दूलवि०
१७६	गुरुजनपरिशंकातङ्कसंकोचिनीं	मालिनी
१८	गुरुप्रसादमन्त्राणाम्	अनुष्टुभ्
२५४	गुरुषु गुरुकुलेषु श्रावका०	मालिनी
१२६	चरणाम्बुजयोस्तवाम्ब	मालभारिणी
१८३	चरितं चरितुं प्रियस्य	,,
१३०	चूडामणिप्रभृतिकं चरणा०	वसन्तति०
५३	जगति जयिनस्ते ते भावाः	हरिणी
१०	जननीव हितेषु जाग्रती सा	मालभारिणी
८	जन्म द्वितीयं जगदर्चनीयम्	उपजातिः
१४	ततः प्रतीतौ स्वगृहान्प्रविश्य	वंशस्थम्
१८८	ततः प्रववृते तयोरति०	पृथ्वी
१०३	ततस्तमवलोकिता भगवती०	,,
९८	ततस्तयोरप्रतिवार्य०	वंशस्थम्
७३	ततो गतायां मदयन्तिकायां	उपजातिः
२०७	ततो गिरं मालति०	,,
१८७	ततो विशदचन्द्रिकाभर०	पृथ्वी
२३५	तत्प्रत्ययाद्विधुरितौ परि०	वसन्तति०
६३	तत्प्रदानमुपकर्ण्य विवर्णः	स्वागता
४	तत्रान्ववायश्रुतवृत्तवित्तौ	उपजातिः
१३५	तत्रैव तावत्स्थातव्यं	अनुष्टुभ्
२१४	तत्रोन्मादवशां दशामुपगतः	शार्दूलवि०
५८	तदुपवननिकुञ्जके प्रथमतरं	अपरवक्त्रम्
६९	तदुपेहि महोत्सवं विदध्याः	मालभारिणी
३७	तन्नीतिरिति विवृते मया	प्रहर्षिणी
२७	तमीक्षमाणा नगरे तरुण्यः	उपजातिः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

९	तयोस्तृतीयाऽप्यभवत् सतीर्थ्या	उपजातिः
१५८	तव प्रतीपं हि लवंगिके	वंशस्थम्
१६१	तस्मिन् दिने मम तरक्षु०	वसन्तति०
१७४	तां चिरायितमिति	स्वागता
११८	तातप्रीतिप्रचयपिशुनै०	मन्दाक्रान्ता
८८	तावच्च हा कठिन तात	वसन्तति०
२००	त्वद्वत्सलः क्व नु तपस्वि०	,,
११४	त्वं वत्सलेति कथमप्यव०	,,
१७०	दयिता वदनारविन्दवान्तं	मालभारिणी
२२१	दिवि स्थिताऽवेक्षत मूर्छितं	उपजातिः
४२	दृष्ट्वा दृष्ट्वा माधवं	शालिनी
१५९	ननु प्रवादो नगरे विजृंभते	वंशस्थम्
२६१	नन्दनेन मकरन्दबन्धुना	रथोद्धता
३६	न यथा मदीयमतिपूर्वकृतिः	प्रमिताक्षरा
६२	नरपतिरुपयातो नन्दनस्या०	मालिनी
२९	नर्ममित्रमथ तां नरभर्तुः	स्वागता
१९C	नाम्ना पितुः स्वस्य	इन्द्रवज्रा
	19 a b are wanting	
३०	निजां प्रतिज्ञामपहातुमक्षमः	वंशस्थम्
२६०	निबद्धकेतुं निनदन्मृदंगाम्	उपजातिः
२०४	निर्भर्त्स्य वत्सलतरा	वसन्तति०
७८	निर्व्यूढे रजनीमुखे तमसि च	शार्दूलवि०
१७२	निश्वस्य दीर्घमथ सा	वसन्तति०
१०८	निपादितायाः करिराज०	उपजातिः
८४	निःसत्त्वानुपहस्य पूतन०	शार्दूलवि०
३३	नृपो यथा न विकृतिमेति	?
१८९	पदाघातैः कांश्चित् कतिचि०	शिखरिणी
२६५	पद्मावतीं कुण्डिनतः कदा०	उपजातिः
२२४	परस्परं तौ परिरभ्य	वंशस्थम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

१६	पद्मावतीपुरपतिः किल	वसन्तति०
१५४	परिचुम्बितमाननाम्बुजं तत्	मालभारिणी
१२४	परिणतिरमणीयाः प्रीतयः	मालिनी
१५२	परिणीय मनोरथप्रियां	वियोगिनी
२२०	पाथोदानां पथि परिचिते	मन्दाक्रान्ता
११६	पितृवनमहीं निर्विण्णः	हरिणी
५	पितृनमर्त्यानतिथीन् महर्षीन्	उपजातिः
१२३	पुनश्च माधवं प्रोचे	अनुष्टुभ्
११२	पुरश्चक्षूरागस्तदनु मनसः	शिखरिणी
१५१	पुलकतिलकितप्ररूढ०	पुष्पिताग्रा
६	पूर्वस्तयोरजनयत् किल	वसन्तति०
२५५	पौरिका.........	रथोद्धता
२६६	प्रकटितमिति पद्यैः	मालिनी
२	प्रकरणतिलकं यन्मालती०	,,
१११	प्रकाश्य सा माधवमन्तरस्थम्	उपजातिः
१६४	प्रशिथिलकचबन्धां प्रस्खल०	मालिनी
१५६	प्रसंगतोऽथ प्रियबुद्धरक्षिता	वंशस्थम्
१९०	प्रहरणममुञ्चन् प्रपेतुः	नाराचम्
८५	प्राकारेण हिरण्मयेन कलितम्	शार्दूलवि०
१२०	प्राजापत्यो विवाहोऽयम्	अनुष्टुभ्
२२७	प्रापय्य तौ सपदि	वसन्तति०
९३	प्रिय माधव मन्दभाग्यया	वियोगिनी
१६६	प्रियाभिधानश्रवणामृतेन	उपेन्द्रवज्रा
१२१	प्रेयो मित्रं बन्धुता वा	शालिनी
१६९	प्रेरिता प्रियसख्येत्थं	अनुष्टुभ्
४७	बकुलकुसुममालां माधवेन	मालिनी
१८२	बध्यतां बध्यतामेष	अनुष्टुभ्
९१	बहलघुसृणलिप्तां बद्ध०	मालिनी
२०६	भुजेन वामेन समं	वंशस्थम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

१२८	श्लाघ्यान्वयेति नयनोत्सव॰	वसन्तति॰
२१२	संज्ञामवाप्य मकरन्द॰	,,
११	सकलासु कलासु पारदृश्वा	मालभारिणी
२०	स देवरातस्य सुतो महात्मा	उपजातिः
३९	संमंत्र्येत्थं मन्त्रिमुख्ये प्रयाते	शालिनी
२३	सा लालयन्ती भुवनैकभूपाम्	उपजातिः
९५	सावेगमद्भुतबलः सहसा	वसन्तति॰
७९	सीत्कारैर्भैरवाणां दिशि दिशि	स्रग्धरा
६७	सुहृन्मोहमुग्धस्ततो माधवः	भुजङ्गप्र॰
१९२	सूर्याचन्द्रमसाविव द्युति॰	शार्दूलवि॰
२५१	सौदामिनी च तामूचे	अनुष्टुभ्
१३	स्वां दुहितरं दुहितृमान्	गीतिः
१४६	हृदयमतिकठोरं मालती॰	मालिनी

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

INDEX II

An alphabetical list of metres occurring in the Ṛjulaghvī. (The Roman fig. against each metre shows the number of stzs. in that metre.)

१	अनुष्टुभ्—	२९	१७	भुजङ्गप्रयातम्—	१
२	अपरवक्त्रम्—	१	१८	मञ्जुभाषिणी—	७
३	आर्या—	२	१९	मन्दाक्रान्ता—	८
४	इन्द्रवज्रा—	२	२०	मालभारिणी—	१८
५	उपजातिः—	३४	२१	मालिनी—	२७
६	उपेन्द्रवज्रा—	४	२२	रथोद्धता—	१०
७	गीतिः—	४	२३	वंशस्थम्—	१५
८	तोटकम्—	२	२४	वसन्ततिलका	३५
९	द्रुतविलम्बितम्—	५	२५	वियोगिनी—	५
१०	नर्दटकम्—	१	२६	शार्दूलविक्रीडितम्—	१८
११	नाराचम्—	२	२७	शालिनी—	३
१२	पुष्पिताग्रा—	७	२८	शिखरिणी—	३
१३	पृथ्वी—	४	२९	स्रग्धरा—	२
१४	प्रमाणिका—	१	३०	स्वागता—	३
१५	प्रमिताक्षरा—	३	३१	हरिणी—	५
१६	प्रहर्षिणी—	३	३२	Unknown—	२

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

INDEX III

An alphabetical list of stanzas from the Mālatī-mādhava quoted in the Ṛjulaghvī.

1. This is put in the mouth of मालती in the ऋजु०.

2. मा. मा. has मदुत्सङ्ग° in the 3rd l.; it has been changed to तदुत्सङ्ग° in the ऋजु० as demanded by the Context.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

NOTES

(MW—Sansk. Eng. Dic. by Monier—Williams)

2. इतिवृत्तं–story, plot.

3. अग्रहारः in l. 1., land donated by the king to the Brāhmaṇas for sustenance; in 1.2, excellent necklace, अग्रश्चासौ हारश्च.

4. अन्वयाय—please correct this as अन्ववाय, family. °वित्त—famous for. Cf. प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः। अमर० III. 1. 9. माधवकेशवाख्यौ—The names of माधव the father of देवरात, and केशव that of भूरिवसु are not found in the मा. मा. They are invented by पूर्णसरस्वती. पुष्पदन्तौ—the sun and the moon. Both the forms पुष्पदन्तौ and पुष्पवन्तौ are correct. अमर० records only the latter, but the रामाश्रमी com. on पुष्पवन्तौ notices the form पुष्पदन्तौ and quotes from हैम, 'पुष्पदन्तौ पुष्पवन्तावेकोक्त्या शशिभास्करौ।'.

5. पितॄन् etc.—a reference to the पञ्चमहायज्ञs which a Brāhmin is enjoined to perform every day. Cf. अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥ मनु० III. 70. गृहं—with स्तम्भौ, a house; with तौ, the life of a householder. गृहं चतुर्णां गतिं etc. Cf. यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः। तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः॥ मनु० III. 77.

6. अन्वित° i. e. अर्थान्वित° i. e. यथार्थनामानम्.

7. सोमत्विष्—having the splendour of the moon.

16. नृपविद्यासु चतुष्टयीषु—The use of the plu. is grammatically wrong. The plu. seems to have been used for the sake of metre. The emendation noted in the footnote solves this grammatical irregularity.

15, 16. The names गुणवर्मा and पद्मवर्मा are not found in the मा. मा. अपारीत् fr. √पॄ to satisfy, to please.

18. सिद्ध्यष्टक° a reference to the eight supernatural powers viz. अणिमा महिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशिता वशिता चैवं तथा कामावशायिता॥ quoted in the रामाश्रमी टीका on अमर० I. 1. 36. Read सिद्ध्यष्ट° for सिध्यष्ट°.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

21. समां-समा a year. The word is usually used in the plu. But sometimes it can be used in other numbers also. Cf. रामाश्रमी टीका on अमर० I. 4. 20. (संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः।) बहुवचननिर्देशात् प्रायेणायं बहुवचनान्तः इति ध्वनयति। क्वचिद् वचनान्तरमपि 'समां समां विजायते' (पा. V. 2. 12) इति सूत्रात्।

22. It was कामन्दकी and not the city of पद्मावती that was enjoying one उत्सव (the birth of मालती) after another (the birth of माधव) and hence पद्मावती has been emended to पद्मावतीम्. In इहावतीर्णां, इह has after all to be taken as equal to 'this earth'. So it has been emended to इला° as it gives the same sense more directly, and in the Devanāgarī Mss. the interchange of ल and ह is quite likely.

24. *Emend* °दक्षां to °दक्षा referring to कामन्दकी. निन्ये-नी Atm. to teach, to instruct. The sense of the 4th line is not quite clear. Perhaps it means—just as the moonlight (ज्योत्स्ना) causes a bright pearl to appear still more beautiful, so कामन्दकी's efforts to teach मालती, who was naturally very intelligent, the कामशास्त्र etc. were productive of very great results. We may perhaps read भासयन्ती for भावयन्ती.

25. Acc. to भवभूति, माधव was sent to पद्मावती to learn आन्वीक्षिकी. Acc. to कामन्दकनीतिसार II. 11, आत्मविद्या is the same as आन्वीक्षिकी, (आन्वीक्षिक्यात्मविद्या स्यात् ईक्षणासुखदुःखयोः।).

27. अचेतयन्त्यः बभूवुः इति शेषः। For a similar description, see रघु० VII. 5-11.

30. डोलायितशेमुषीं—The form डोलायित is as correct as दोलायित, though of rare occurrence. It is denominative fr. डोला, a swing. MW records डोला as occurring in the Bālarāmāyaṇa VII Act. For the idea Cf. आसीत् स दोलाचलचित्तवृत्तिः—Raghu. 14. 34. शेमुषी, intellect.

31. निराकृतच्छलेन—निराकृतं by भावे क्तः is equal to निराकृतिः; निराकृतं च असौ छलश्च (कर्मधा.); refusal under some pretext. Perhaps the emendation निराकृतिं छलेन would make the text

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

smoother and easier to understand. तच्छलतां प्रकाशयाम 'we shall explain the pretext used in giving the refusal', must be taken as the कविवाक्य, though it is the least expected here. As noted in the foot-note to this stanza there seems to be some lacuna here and only a discovery of another Ms. would remove this irregularity.

32. तव—This is said only to please कामंदकी, 'मालती is as good as your own daughter' so that she may take the greatest interest in defeating the plan of the king. Or emend तव to मम. The Index of Metres records the metres of this and the following stanzas as Unknown. But I must thank Dr. Raghavan who has been successful in finding them out, as he says, 'after a great toil with them'. According to his suggestion, उपचारभाषितमृते must go with an earlier verse which is lost except for that fragment, and अपि should be emended to अभि. Thus the first half will read अभियाचते नृपमुखेन। तव (मम?) दुहितरं स नन्दनः।. The 2nd half is alright. The metre then would be उद्गता (a विषमवृत्त) of the 2nd variety acc. to the छन्दोमञ्जरी of Gaṅgādāsa (Kaśī. Sk. Series No. 55, p. 240). It is defined as प्रथमे सजौ यदि सलौ च, नसजगुरुकाण्यनन्तरम्। यद्यथ भनजलगाः स्युरथो, सजसा जगौ च भवतीयमुद्गता॥ i. e. the *gaṇa*—scheme is

स ज स ल, न स ज ग।

भ न ज ल ग, स ज स ज ग॥

and in illustration is quoted the stanza अथ वासवस्य वचनेन etc.—किरात० XII. 1. of भारवि.

33. The metre of this stz. would be सौरभक if we shift a single letter in the first line (न नृपो यथा instead of नृपो यथा न and drop another (त्वं) in the 3rd. The stanza as emended would read thus :—न नृपो यथा विकृतिमेति, हृतिरपि यथा न संविदः। नेतुमर्हसि तथा घटनां, मतिशालिनां किमिव नाम दुर्घटम्॥. The सौरभक is defined in केदारभट्ट's वृत्तरत्नाकर (K. S. S. 55, P. 119) as चरणत्रयं व्रजति लक्ष्म, यदि सकलमुद्गतागतम्। नौ भगौ

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

भवति सौरभकं चरणे यदीह भवतस्तृतीयके ॥ i. e. The *gaṇa*-scheme would be स ज स ल, न स ज ग । र न भ ग, स ज स ज ग॥. संविद् = प्रतिज्ञा see stz. 12 above. हति: = हानि: violation.

36. न यथा...प्रथते, it should not, however, be known by people that it is done with my knowledge and sanction.

37. विवृतं by भावे क्तः = विवरणं exposition. नीतेः इति विवृते = नीतेः इति विवरणे (कृते सति).

38. तिष्ठावहे are guided by your advice. Cf. संशय्य कर्णादिषु तिष्ठते य: । किरात॰ 3. 14.

39. निसृष्टार्थदूत्यं—a निसृष्टार्थदूत is a messenger who acts on his own responsibility, the full management of a business being entrusted to him. Cf. निसृष्टार्थो मितार्थश्च तथा शासनवाहकः । सामर्थ्यात्पादतो हीनो दूतस्तु त्रिविधो मतः ॥ कामंद. 13. 3.

42. पृषत्कः, an arrow.

45. गुणित enumerated. आभल्लकेन, read it as आयल्लकेन. आयल्लकम् = उत्कंठा, longing, see Śabdakalpadruma ; and Kalpadrukośa I (GOS. XLII) हल्लेखा स्याद्रणरणस्तद्वदायल्लकः पुनः । P. 429, stz. 115.

46. तदुत्सङ्ग°—मा. मा. has मदुत्सङ्ग° as कामन्दकी is the speaker there. But here as the poet is narrating the story it is appropriately changed to तदुत्सङ्ग°.

48. तीर्थेन–तीर्थ, medium, means. Cf. मा. मा. I. 15. 6 तदनेन तीर्थेन घटेत etc.

54. प्रतियातना, a picture, a portrait.

57. उपहृत, brought i. e. caused.

58. हरिणदृशी, read °र्शी.

60. नखरायुध, a tiger.

63. अभियुक्त, attacked.

64. कदंब, collection, multitude. दम्भोलि, a thunderbolt.

65. उर:पीठी, broad chest. पीठं, a seat, rarely पीठी—MW. क्षतज, blood. घुसृण, saffron.

66. गाढप्रहर—Read गाढप्रहार.

70. शशिरुचि, the lustre or splendour of the moon i. e. ज्योत्स्ना.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

71. नन्दथुः, pleasure, delight, happiness.

72. मराली–female swan. परिलुण्ठ् to steal, carry off.

77. चण्डातक—a pair of shorts, or tunic. Cf. कार्दमिकचेलचीरिकानियमितोच्चण्डचण्डातकम्—हर्षचरित II. para 7. These two references show that चण्डातक was a garment worn by males. But Sanskrit lexicons would make it appear that चण्डातक was put on by women only. Cf. अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम् । अमर॰ II. 6. 119. and अर्धोरुकं चलनकं स्याच्चण्डातकमंशुकम् । सभर्तृकाणां...॥ कल्पद्रुकोष Vol. I, p. 52, stz. 261, GOS. No. XLII.

78. अमुना–माधवेन.

79. फेरव—a jackal. किटि (or किरि) a hog.

83. आकल्प, dress, decoration.

84. पितृवनं, श्मशानं. करङ्क skull or a skeleton. कुणप, a corpse. दुष्ट, defiled, rendered unholy.

85. ब्रध्नः, the sun.

88. श्रवसी, the ears.

90. उपयाचितं, a present promised to a deity to propitiate her. स्वं जीवितं i. e. मालतीं.

91. अलिकं, forehead.

92. चण्डमुण्डा, a form of दुर्गा, here = कराला.

94. वर्मन्, armour.

95. मुसल्यः मुसलेन वध्यः. Cf. अमर. III. 1. 5....वध्यो मुसल्यो मुसलेन यः ।

104. निष्ण, clever, adept.

105. उड्डामर, excellent.

106. गर्भगृह, the sanctuary of the temple, the नगरदेवतामन्दिर in stz. 103 above.

107. गोपुर, the ornamental gate-way of a temple.

109. उत्क, eager, desirous of.

117. लिङ्गिनी i. e. कामन्दकी.

118. पितृसवयसा i. e. कामन्दक्या. सवयस्, a companion, friend.

119. उत्करः, a multitude.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

120. उपबृंहित, supported.

125. भणिती speech. MW does not record this word but only भणिति.

130. लेपनं paste i. e. sandle-paste.

138. व्रीडयतीं—pre. part. fr. the denominative of व्रीडा, bashfulness. Or we may emend it to व्रीडवतीं for व्रीड: = व्रीडा. Kālidāsa has used the word व्रीड as noted by तत्त्वबोधिनी (com. on सिद्धान्तकौमुदी) in व्रीडमावहति मे स संप्रति. The emended reading would also improve the alliteration.

139. अवकुण्ठन—Both the forms अवकुण्ठन and अवगुण्ठन are correct. For the former, see stz. 174 above.

142. आकल्प:, ornament.

145. The 4th l. appears corrupt.

148. कौतुकमन्दिर, the house in which a marriage is to take place.

160. For प्रयाण°, read प्रमाण°.

161. तरक्षु:, a tiger.

164. अनुपाधि अविद्यमानः उपाधि: (condition, reflection) यस्मिन् कर्मणि यथा स्यात्तथा, without a moment's hesitation. मंक्षु, quickly, immediately.

166. आचित covered with.

168. किल used in the sense of अलीक. बुद्ध° pretended to enter only after this speech of लवङ्गिका. Really speaking she was hiding herself somewhere there all the while.

169. अर्पिता, given i. e. caused by.

171. प्रतिपत्ति, course of action. Cf. वयस्य, का प्रतिपत्तिरत्र मालविकाग्निमित्र III. 19. 4. प्रति...का—What would you do in this case?

176. Read °परिणाहं for परिणाहान्. परिणाह, extent. 'परिणाहो विशालता'—अमर. II. 6. 114.

177. कालेय, black sandal. वीथी wood.

180. नंदयो: (?) There must be some word here meaning राम and लक्ष्मण.

184. दिष्टिवृद्धिवचसा—Cf. दिष्ट्या वर्धसे मदयन्तिकालाभेन—मा. मा. VIII. 6. 7.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

187. पटीर, sandal wood.

188. पुरातनमुनीन्द्रयोः—This seems to be a reference to नर and नारायण, the two ancient sages having their hermitage at Badarikedāra. Cf. Mbh. III. 145. 23 (Critical Ed.)

189. असङ्गात् ind., unobstructedly, easily. क्षतभवं, blood सैन्यः, a guard, a sentinel, a soldier.

192. दस्रौ, the two अश्विन्'s. दैत्यामरेज्यौ i. e. शुक्र and बृहस्पति. इज्य, a teacher.

216. अकल्यहृदयः—(अकल्य unwell) sick at heart. Cf. अमर. III. 3. 159 कल्यौ सज्जनिरामयौ.

217. तदुपहित°—तया विपदा उपहितं. उपहित, preceded by or connected with, i. e. caused or occasioned by.

220. पाथोदः, a cloud. **221.** °वेक्षत, read वैक्षत.

222. विद्यया नन्दयन्ती—*Emend this to* विद्यया तं नयन्ती. Cf. मा. मा. इति समाधवा निष्क्रान्ता IX. 51. 1. **230.** °मयुक्तं, read मयुंक्त.

237. In the मा. मा. this stz. is uttered by माधव and मकरन्द ; here however it is put in the mouth of मालती.

245. अन्तेवासिन्या i. e. कपालकुण्डलया.

246. परिवृढः, lórd. Cf. अमर. III. 1. 11. प्रभुः परिवृढोऽधिपः ।

249. वाचिकं, a message.

250. अनुसंदधे (pass.) was inquired about. मधुवैरिणः—माधवस्य. We must read the following remark of कामन्दकी before 250*cd* to grasp its full significance :—कामन्दकी—अस्ति वा कुतश्चिदेवंभूतमद्भुतं विचित्ररमणीयोज्ज्वलं प्रकरणम्। मा. मा. X. 23. 14–15. This remark, which must have roused the curiosity of मदयन्तिका and others is taken for granted by our poet.

251–252. Cf. मा. मा. X. 23. 16–17. इदमत्र रमणीयतरं यदमात्ययोर्भूरिवसुदेवरातयोश्चिरात्पूर्णोऽयमितरेतरापत्यसम्बन्धात्मा मनोरथः।

253*cd*. Cf. मा. मा. X. 23. 19–20 माधवमकरन्दौ—भगवति अन्यथा वस्तुवृत्तमन्यथा वचनमार्यायाः ।

256. जिनव्रतिनी—(जिनः =बुद्धः) कामन्दकी. Cf. अमर. I. 1. 13, मारजिल्लोकजिज्जिनः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

ERRATA

Page		For	Read
1	l. 14	तत्रान्वयुाय	तत्रान्वयाय
4	l. 11	सिध्यष्ट	सिध्यष्ट
11	l. 21	हरिणदशी	हरिणदर्शी
13	l. 5	द्रुतगति	द्रुतगति
13	l. 13	प्रहर	प्रहार
31	l. 8	प्रयाण	प्रमाण
43	l. 6	स्थिताऽवेक्षत	स्थिताऽवैक्षत
43	l. 13	नन्दयन्ती	तं नयन्ती
45	l. 4	मयुक्तं	मयुंक्त
48	l. 3	रायुष्मतायो	रायुष्मता यो
55	l. 6	?	उद्धता 2nd
57	l. 26	?	सौरभक
63	l. 15	VI. 15—„ 111	VI. 15—„ 112
63	l. 19	X. 21—„ 249	X. 21—„ 240
63	l. 21	III. 3—„ 45	III. 3—„ 46

CC-0. Prof. Satya Vrat Shastri Collection.

POONA ORIENTAL SERIES

Digitized by Sarayu Trust Foundation and eGangotri

LATEST PUBLICATIONS

83. **Ṛjulaghvī or Mālatīmādhava kathā** (ऋजुलघ्वी-मालतीमाधवकथा) critically edited for the first time from the only Ms. with an introduction and explanatory notes by Prof. N. A. Gore with a Foreword by Dr. V. Raghavan. 1943. Rs. 2.

82-79. **Guides to Manual of Pa'i in English; Hindi; Gujarati each at As. 12 and Marathi As. 8.**

78. **Chāndogyopaniṣad** (छान्दोग्योपनिषद्) English translation of the Text and Śankara Bhāṣya by late MM. Dr. Ganganath Jha with an Introduction and Index by Dr. Umesha Mishra. Revised edition, 1942. Rs. 5 10

77. **Alankāra-ratnākara** (अलङ्काररत्नाकर) of Śobhākara-miśra. A work on Rhetoric edited with an Intro. Commentary and Appendices by Prof. C. R. Devadhar. The author has written his own Sūtras on Alankāra, has elaborated them in his Commentary, illustrated them by examples drawn from varied sources and summarised his views on particular topics in what are known as Pariśiṣta Ślokas. 1942. Rs. 5 0

76. **History of the Guptas** by Prof. R. N. Dandekar. A complete connected history of the Guptas, the Imperial Guptas and the later Guptas of Malwa and Magadha, 1942. Rs. 3 0

75. **Festschrift Prof. P. V. Kane.** A Volume of Studies in Indology containing 74 articles. 1941. Rs. 16-14

74. **Ancient India & South Indian History and Culture** by D. B. Dr. S. Krishnaswami Aiyangar. A thouroughly revised edition brought up-to-date; begins with a historical survey up to 700 A.D. and ends with a chapter on Greater India. 2 Vols. 1941. Rs. 22-8

17. Tarkabhāṣā Text ed. Kulkarni N. N. Revised ed. 1943. Re 1

WORKS IN PRES

Uvāsagadasāo (उवासगदसाओ) Text, ... N. A. Gore.

Mayūra-sandeśa (मयूरसंदेश) of Ud... Comm.. by Dr. C. Kunhan Raja.

ORIENTAL BOOK ...

15 Shukrawar, Poona

CC-0. Prof. Satya Vrat Shastri Collection.